
वैशाखमासः
वर्षम् –६८
सप्तमोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ मई २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | शिवः सेव्यताम् | पं. शशिनाथ झा | ५ |
| ५ | स्वनामधन्याः प्रो. श्रीनिवासरथमहाभागाः | श्रीमती सन्जू शर्मा | ६ |
| ६ | मनुस्मृतिप्रतिपादितानाम् अर्थशास्त्रीयविषयाणां .... | डॉ. हेमराज शर्मा ( साहित्याचार्य ) | ७ |
| ७ | राजनीतिशास्त्रज्ञः कालिदासः | बाबूलालः मीना | १० |
| ८ | कुरु श्रमम् | डॉ. भूपेन्द्रकुमारराठौरः, कोटा | १३ |
| ९ | वैदिकसाहित्ये भारतीयसंस्कृतिः | डॉ. सरोजकुमारपाढी | १४ |
| १० | पत्रकारतासमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १६ |
| ११ | दत्तन्न राष्ट्राय किम् | डॉ. रामनारायण झा | १८ |
| १२ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १९ |
| १३ | राष्ट्रं प्रति कर्त्तव्य-भावना | डॉ. अनिता अग्रवाल | २० |
| १४ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २१ |
| १५ | ज्योतिषशास्त्रस्य प्रारम्भिकपरिचयः | पं. मनीष उपाध्यायः | २२ |
| १६ | परिभाषायणां कार्यं लक्ष्यञ्च | डॉ. महेन्द्र शर्मा | २४ |
| १७ | दृश्यश्रव्यशिक्षयोः संकल्पना | सचिनकुमारः | २६ |
| १८ | चार्वाकदर्शने गुणभेदपर्यालोचनम् | सतीश रछोया | ३० |
| २९ | नास्ति किञ्चन दुष्करम् | डॉ. राजेश्वरी भट्टः | ३१ |
| ३० | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामाशर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयल

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

श्रीरामो नवमी दिने सितदले प्रादुर्बभूव क्षितौ
दुष्टान् दण्डयितुं ययौ निशिचरान् यो दण्डकाख्ये वने।
सुग्रीवाय ददौ स्वराज्यमपि यो हत्वा रणे बालिनं
भक्तानां प्रियकारकं रघुवरं वन्दामहे श्रेयसे।

## मासावतरणम्

वैशाखे कृषका हलेन वसुधां कर्षन्ति सूर्यातपे
सीताप्याविरभूत् पुरा सितदले वैशाखमासे शुभे।
मासेऽस्मिन्नसिते दले मुनिवरो जातः किलायं शुकः
रामोऽप्याविरभूत् शिवे द्विजकुले मासे शुभे राधके।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वैशाखमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
मई, 2017
अङ्कः - 7
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# समाधानस्य श्रेष्ठतरो मार्गः वार्ता-एव

...✍ पं. प्यारेमोहनशर्मा

अयोध्यायां विवादितं राममन्दिरमादाय सितम्बर-मासस्य त्रिंशत्तमे दिनाङ्के 2010 तमे ख्रिष्टाब्दे इलाहबादस्योच्चन्यायालयो यं निर्णयं कृतवान् तद्विरुद्धं सुन्नीवक्फबोर्डसंस्था-अन्ये चोच्चतमे न्यायालये परिवादं प्रास्तुवन्। तेन न्यायालयेन स्थगनादेशः प्रदत्तो वर्तते। उच्चतमन्यायालयस्य मुख्यन्यायाधीशजे.एस.खेहर-महोदयस्य सम्मुखे भारतीयजनतादलस्य नेता सुब्रह्मण्यम स्वामी न्यवेदयत् यदेषः वादः सप्तवर्षेभ्यः प्राचीनो विद्यते। अतः श्रीमन्तः प्रतिदिनं वादविषये शृण्वन्तु। अत्र ध्येयं यदद्यावधि नियमितरूपेण वादविवादविषये न्यायालये श्रवणं प्राचलत्।

एष विवादः किमिति प्राचलत् यतोहि रामो नाद्य जनिमलभत। रामस्य जन्म अयोध्यायामभवत्। तेन दशसहस्रवर्षपर्यन्तम् अयोध्यायां राज्यं कृतम्। तस्मिन् समये केवलं सनातनधर्म एवास्तित्वेऽविद्यत।

उच्चतमन्यायालये न्यायाधीशा उपविशन्ति तदा अभिभाषकाः स्वस्वविषयानुल्लिखन्ति। सुब्रह्मण्यम-स्वामिनःउल्लेखे न्यायाधीशखेहरमहोदयानामेषा टिप्पणी अत्यन्तं महत्वपूर्णा विद्यते यदुभौ पक्षौ-अमुं विषयं न्यायालयाद् बहिरेव समाधानं कुरुतां तदा तु सर्वश्रेष्ठं भवेत्। तेषामिदं कथनमपि समुचितं यदयं विषयः धर्मेणास्थया च सम्बद्धो विद्यते। अतः न्यायालयाद् बहिरेव समाधानं श्रेष्ठतरं विद्यते। सर्वाधिकं श्रेष्ठं तु इदं विद्यते यत् न्यायाधीशो खेहरः अवदत् यत् सर्वे पक्षाः परस्परं वार्तालापाय सन्नद्धाः स्युस्तर्हि उच्चतमन्यायालयः स्वकीयमेकं न्यायाधीशं मध्यस्थतायै नियोक्तुं शक्नोति। न्यायाधीशः खेहरः स्वामिनम् अवदत् मार्चमासस्य एकत्रिंशदिनाङ्कं यावत् (2017) सुनिश्चितं कुर्यात् यत् पक्षकाराः परस्परं वार्तया प्रकरणस्य समाधानं कर्तुं सहमताः सन्ति। यदि सर्वे पक्षकाराः सहभताः स्युस्तर्हि 31 मार्च दिवसे सर्वोच्चन्यायालयं निवेदयेयुः। परन्तु यदि सर्वेभ्यः पक्षेभ्यः वार्तालापः सफलः नैव भवति तर्हि नियमितरूपेण श्रवणं विधाय प्रकरणस्य निस्तारणं सर्वोच्चन्यायालयो विधास्यति। अत्रेदमवधेयं यत् विवादितं स्थानमादाय पूर्वमपि मध्यस्थतायाः प्रयत्नाः कृताः परन्तु न किमपि समाधानं संजातम्। अतो न्यायालये निर्णयो भवेत् तं च सर्वे स्वीकरिष्यन्ति। परन्तु सेवानिवृत्तो न्यायाधीशः शिवकुमारशर्मा मनुते यन्महान्तोऽपि विवादाः वार्ताभिः समाधीयन्ते। लोकन्यायालयैः प्रत्यहं परस्परं प्रबोधनेनैव सहस्रशो विवादाः समाधीयन्ते। भारते न्यायालयेषु सहस्रशो विवादाः सुरक्षिताः समाधानप्रतीक्षायां न्यायालयेषु लम्बिताः विद्यन्ते। संसारस्य विशालतमे लोकतन्त्रात्मके भारते न्यायाधीशानां संख्या सीमिता विद्यते। अमरीका प्रभृतिषु देशेषु (10) दशवादविवादानां कृते एको न्यायाधीशो विद्यते भारते च तादृशी व्यवस्था यदि क्रियते तर्हि सहस्रशो न्यायालयेषु तावत्यां संख्यायामेव न्यायाधीशानां नियुक्तिर्भवेत् तदा समये न्यायः प्राप्तुं शक्यः परन्तु भारते एतन्न संभवम्। अतो यदा लोकन्यायालयाः परस्परप्रबोधैः विवादान् समाधीयन्ते तदा बावरीमस्जिद राममन्दिरसम्बद्धो विषयोऽपि वार्ताभिरेव समाधेयः। परन्तु इदं समाधानं तदैव संभवं यदा द्वावपि पक्षकारौ परस्परं वार्तायै समाधानाय चोत्सुकौ भवेताम्। अन्यथा उच्चतमन्यायालये एतादृशा विवादाः शतशो वर्षाणि यावत् लम्बिताः पतन्ति।

अन्यच्च पुरातत्वविभागेन बाबरीस्थाने खननं कृतं खनने च यानि पात्राणि समुपलब्धानि तानि सर्वाणि मन्दिरेण सम्बद्धानि सन्ति। वस्तुतः सर्वेषु वर्गेषु तादृशाः

जना: सर्वदैव जायन्ते ये अनधिकृतानि कार्याणि कुर्वन्ति। परस्परं लोकेषु कलहमुत्पादयन्ति। रामराज्येऽपि राक्षसा: खरदूषणादय: स्वसीमानमुल्लङ्घ्य इक्ष्वाकूनां सीमाया-मधिकारमकार्षु: अस्य प्रमाणं विद्यते यत् दण्डकारण्ये अगस्त्यस्तदीयो भ्राता शरभङ्ग: सुतीक्ष्णप्रभृतयो महर्ष-यो न्यवसन् राक्षसाश्च तेषां यज्ञादिकं मांसखण्ड-प्रक्षेपणादिना उपद्रवमकार्षु:। ऋषीणां प्रार्थनया रामो दशसहस्रराक्षसान् जघान। तथैव केचन असामाजिका: राममन्दिरं बलात् बाबरीति घोषयन्ति। यद्यपि मुस्लिमसमुदायेऽपि बहवो समस्याया: शान्तिपूर्ण-समाधानमभिलषन्ति। रावणो यदा दण्डकारण्यमा-क्रान्तुमैच्छत् तदा मारीच: तं न्यषेधयत्। ''न विरोधो बलवता क्षमो रावण तेन ते''। अत: सर्वै: मिलित्वा वार्ताभिरेव समस्याया: समाधानं विधेयम्। अन्यथा तु रावणस्य या दशा जाता सापि स्मरणीया। अहं विश्वसिमि वार्ताभिरेव समाधानं भविष्यति।

# शिव: सेव्यताम्

❑ पं. शशिनाथ झा

नमस्तस्मै परेशाय, शिवाय परमात्मने।
जगत्प्रवृत्तिबीजाय, येनार्धाङ्गीकृता शिवा।। 1।।

शिवशक्त्यो: सामरस्यं, शर्करादुग्धसन्निभम्।
नमामि शुद्धचैतन्यं, शङ्करं परमं शिवम्।। 2।।

अहङ्कारात्मिका शक्तिरहमस्मि सदाशिव:।
शिवं शक्तिसमाविष्टं, नौमि सर्वार्थसिद्धिदम्।। 3।।

हरो महेश्वर: शर्व ईशानो लोकशङ्कर:।
साधकै: शुद्धविद्यैव, यत्प्रसादादवाप्यते।। 4।।

वन्दनीया महामाया, यया सम्मोहितं जगत्।
आस्फाल्य कञ्चुकं या हि, कुरुते जगदन्यथा।। 5।।

कला-विद्या-राग-काल-नियतिच्छादित: पुमान्।
पञ्चकञ्चुक-संवीतो न जानाति स्वयं स क:।। 6।।

अविद्योपाधिमुक्त्यर्थं, विद्यौषधिनिषेवणम्।
स्वच्छा: कञ्चुकनिर्मुक्ता:, पुरुषा उरगा इव।। 7।।

ज्ञानलुप्तं जगद् ज्ञानदाता शिव:
शक्तिहीनं जगत् शक्तिदाता मृड:।
दु:खमग्नं जगद् दु:खहारी हर:
सर्वथा सर्वदात: शिव: सेव्यताम्।। 8।।

# वसन्ते नभोमण्डलम्

❑ पं. शशिनाथ झा

(1)

नवीना विना भूषणं भूषिताङ्गी
प्रसन्ना हि नीलांशुकालोकिताङ्गी।
घनाडम्बरान्त: स्फुरच्चन्द्रबिम्बो-
ज्ज्वलस्येव शोभा नभोमण्डलस्य।।

(2)

निरालोक-लोकप्रकाशस्वरूप:
प्रभाते प्रभात: समोद्बोधकार:।
सदोद्दीप्तरश्मिव्रजोत्कृष्टसत्त्वो
मणिर्भाति भास्वान्नभोमण्डलस्य।।

(3)

सुधामौषधीभ्य: किरत्योषधीश:
पयोरश्मिधारानुधाराप्तलोक:।
निशेश: प्रियस्तारकामण्डलस्य
मणिर्भाति भेशो नभोमण्डलस्य।।

(4)

अबीराभ्रकासारलेखातिरम्या
नवीनाभिरामाप्तरक्ता हि भूमि:।
उष:कालिकारक्तसक्तोडुजालं
किमेतं धरण्यां नभोमण्डलस्य।।

व्याकरणविभागाध्यक्ष:
कामेश्वर सिंह दरभंगा-संस्कृत-विश्वविद्यालय:, दरभंगा

# स्वनामधन्याः प्रो. श्रीनिवासरथमहाभागाः

❑ श्रीमती सन्जू शर्मा

**''जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।।**
**नास्ति तेषां यशःकाये जरामरणजं भयम्।।''**

उक्तिरियं वास्तविकरूपेण सिद्धान्तस्थापयित्री यत् रससिद्धाः कवीश्वराः रचनाकाराः वा सर्वकालेष्वेव जीविताः भवन्ति। तेषामनुपस्थितिः खलु लोकात् कदापि न जायते। प्रतिक्षणं ते येन केन प्रकारेण स्वकीयेन यशःशरीरेण समाज-मुपकुर्वन्त्येव।

साहित्यराजरसिकाः तेषां रचनाः पठन्तः पठन्तः प्रत्युत स्वस्मिन् नवजीवनस्य सञ्चरणमनुभवन्ति।

ताभिः रचनाभिः एते स्वकीयेन भूरिपरिश्रमेण स्वकीयमन्तव्यमपि मिश्रीकृत्य द्विगुणितां शक्तिं प्रयच्छन्ति समाजाय।

आधुनिकेषु यथार्थचिन्तनपरायणेषु कविषु स्वनाम-धन्यानां श्रीमतां प्रो. श्रीनिवासरथमहोदयानां नामापि प्रमुखत्वं भजते।

भवतां जन्म भगवतो जगन्नाथस्य पुर्य्याम् उडीसाराज्ये नवम्बरमासस्य प्रथमायां तारिकायां 1933 तमे ख्रीस्ताब्दे सञ्जातम्।

भवतामध्ययनं भगवतो विश्वनाथस्य नगर्य्यां वाराणस्यां या संस्कृताध्ययनस्य विश्वविख्यातनगरी वर्तते अत्रैव सुसम्पन्नमभवत्।

अध्ययनकाले भवन्तः स्वकीयेषु सतीर्थ्येषु प्रत्युत्पन्नमतयः मेधाविनश्च आसन्। समये-समये प्रचलितेषु शास्त्रार्थेषु विजयश्रीः भवतां वरणं करोति स्म।

अध्ययनस्य सम्पन्नतानन्तरं भवन्तः विविधेषु उच्चसंस्थानेषु अध्यापनं कृत्वा संस्कृतस्य दृढतया प्रचार-प्रसारयोः संलग्नाः अभवन्।

1955 तः 1957 ख्रीस्ताब्दपर्यन्तं भवन्तः स्वकीयां सेवां सागरविश्वविद्यालये (म.प्रदेशे) प्रादुः।

1958 तः 1993 ख्रीस्ताब्दपर्यन्तं भवतां सेवा विक्रम-विश्वविद्यालये सम्पन्ना अभवत्।

संस्कृतभाषायाः क्रियाकलापेषु अद्य मध्यप्रदेशीयायाः कालिदासअकादम्याः बहु नामास्ति। अकादमी अस्मिन् वर्षे अनेकेषां सार्थककार्यक्रमाणामायोजनामपि सम्पादयिष्यति। इमे महाभागाः अस्यामकादम्यां मानद उपनिदेशकपदं अनन्तरम् अध्यक्षपदं चालंकृतवन्तः।

एषाम् अध्यक्षत्वे कालिदास-अकादम्याः बहुप्रकारेण विकासः अभवत्। अनेकेषां ग्रंथानां प्रकाशनञ्चाभवत्।

समये समये आयोज्यमानेषु कविसम्मेलनेषु भवद्भिरचितानां कवितानां प्रकृष्टत्वं सर्वत्र भारतदेशे प्राचुर्येण प्रसारितमभवत्।

राष्ट्रचिन्तनमुद्दिश्य भवतां लेखिन्या विरचिता कविता तथा च भवतामास्यपद्माद्बहिरागत्य अतीव प्रभावती भूत्वा श्रोतृवर्गे अतीव प्रभावशालिनी भवति स्म विविधासु रागमालासु गुम्फिता उत्कृष्टविषयवस्तुनाच्छादिता च।

इत्थं भवतामपारकवितानां संग्रहो जातः। सः कालान्तरे ''तदेव गगनं सैव धरा'' इति नाम धारयित्वा भूपटले प्रकटितोऽभूत्।

तत्र रथमहोदयानां सम्पूर्णां सहृदयतां वयं द्रष्टुं शक्नुमः। एताः कविताः पठतां सहृदयानां भावाः तत्कालमेव राष्ट्रनिर्माणाय दृढा भवन्ति। चित्तं वाञ्छति यत् कथं न अहं अस्मिन् क्षणे एव भारतात् असत् तत्वानां निस्सारणे संलग्नो भवानि। एतेषां कृतित्वमीदृशमुत्कृष्टमासीत् यत् एतस्य फलस्वरूपेण एभ्यः 1993 तमे वर्षे राष्ट्रपतिसम्मानं साहित्यअकादमीपुरस्कारः 1999 तमे वर्षे विद्या भारती पुरस्कारप्राप्तिश्च सञ्जाताः।

जूनमासस्य त्रयोदश्यां तिथौ 2014 तमे ख्रीस्ताब्दे एतेषां वैकुण्ठवासो सञ्जातः। किन्तु तेषां जीवन्तता तु अद्याप्यस्ति एव।

निवाणा (जयपुरम्) राजस्थानम्

# मनुस्मृतिप्रतिपादितानाम् अर्थशास्त्रीयविषयाणां समीक्षा

❑ डॉ. हेमराज शर्मा ( साहित्याचार्य )

मानवजातेः जगत्पितृस्वरूपेण आचार्यमनुः प्रख्यातोऽस्ति। मनुः न केवलं मानवानां प्रथमपिताऽपितु मानवसभ्यतायाः संस्कृतेश्चापि आदिपुरुषत्वेन संस्थापकत्वेन च मन्यते। तेन मानवीयपरम्परायाः सर्वेषां प्राणभूतानां तत्त्वानामालोचनं कृतं तत्र मनुस्मृतौ। सा मनुस्मृतिः धर्मशास्त्रस्यादिमो ग्रन्थो वर्तते। धर्मशास्त्रे यद्यपि मानवसंस्कृतेः धार्मिकतत्त्वानामेव प्रथमतो गणनाऽनुभूयते तथापि मानवानां जीवनस्य न केवलमाजन्मतो मृत्युपर्यन्तमपितु जन्मजन्मान्तरेऽपि धर्मस्य महत्त्वं श्रूयते दरीदृश्यते च। मनुष्याणां जीवनं धर्ममयसंस्कारमात्रमेव। मानवजीवनस्य आधारभूतेषु धर्मार्थकाममोक्षेषु चतुर्वर्गेषु धर्मस्यैव प्रथमगतिरस्यैव माहात्म्यं सूचयति तदर्थं प्राप्तप्रसंगत्वेन आचार्यमनुना प्रोच्यते–

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।**

मानवेतरप्राणिनां सापेक्ष्येण मानवधर्मस्य सत्तयैवस्वभिन्नत्वं सर्वोत्तमत्वं च भवति–

**आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।**

तस्य धर्मस्य उपादानरूपेण धर्मलक्षणत्वेन उच्यते–

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।**

अस्तु सत्यपि धर्मशास्त्रस्य धर्मतत्त्वप्रतिपादकशास्त्रे, अस्य अखिलविद्यामौलिभूतं सकलशास्त्रसमन्वितभूतं दरीदृश्यते। तेन मनुस्मृतिः धर्मशास्त्र-अर्थशास्त्रराजनीतिशास्त्रनीतिशास्त्रेत्यादीनां शास्त्राणां समवायोऽस्ति।

अस्यां मनुस्मृतावर्थशास्त्रस्य राजनीतिशास्त्रस्य वा नैके विषयाः प्रतिपादिताः येनार्थशास्त्रस्य सम्पूर्णज्ञानं भवितुमर्हति। तत्र गुप्तचरव्यवस्था, दूतव्यवस्था, मन्त्रप्रयोगः, षाड्गुण्यम्, उपायचतुष्टयं, प्रकृतिसप्तकं, विद्याचतुष्टयमित्येतानि तत्त्वान्यर्थशास्त्रे प्रमुखत्वेन वर्णितानि दृश्यन्ते। एतेषामेव प्रमुखाणामर्थशास्त्रीयविषयाणां समालोचनं मनुस्मृतावस्माभिर्दृश्यते तत्र–

**१. विद्याचतुष्टयम्** –

मनुस्मृतौ चतसृणां विद्यानां प्रतिपादनं वर्तते। अत्रोच्यते यत्–

**त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।**
**आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः।।**
**मनु. ७/४३**

आचार्यमनुना राज्ञः शिक्षणप्रस्तावेनोच्यते यद् विजिगीषुः राजा त्रिवेदिनः त्रयीविद्यां, नित्यां दण्डनीतिं, पारम्पर्यागतत्वेनअर्थशास्त्ररूपाम् अर्थयोगक्षेमोपदेशिनीम् आन्वीक्षिकीं तर्कविद्यां भूतप्रवृत्तिप्रयुक्त्युपयोगिनीं ब्रह्मविद्यां कृषिपाशुपल्यवाणिज्यरूपां च वार्तां गृह्णीयात्।

**२. मन्त्रप्रयोगः**–

मन्त्रस्य विषये आचार्यमनुना प्रोच्यते–

**सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता।**
**मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतम्।। मनु. ७/५८**

अत्र निर्दिश्यते यद् राजा स्वसचिवेषु धार्मिकत्वविशिष्टेन ब्राह्मणेन सह मन्त्रनिरूपणं कुर्यादिति। तत्र पंचांगभूतस्य मन्त्रस्य स्थलविषये मनुना निर्दिश्यते यत्–

**गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः।**
**अरण्ये निःशलाके वा मन्त्रयेदविभावितः।।**
**मनु. ७/१४७**

मन्त्रस्य सरहस्यत्वम् अत्यावश्यकं वर्तते यस्माद्धि शक्तिहीनः कोशरहितोऽपि राजा सर्वलोकेषु जेगीयते-

**यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः।**
**स कृत्स्नां पृथिवीं भुंक्ते कोशहीनोऽपि पार्थिवः।।**
**मनु.-७/१४८**

**३. दूतव्यवस्था-**

राज्यशासनस्यानिवार्यभूतम् अंगमस्ति दूतव्यवस्था। दूत एव राज्ञः सर्वप्रधानाधिकारिषु अन्यतमो वर्तते यतोहि तस्याधीन एव राज्यस्य सर्वाशय इति। तेन दूतनियुक्तिनियमानित्थं वर्णयति मनुः-

**दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।**
**इंगिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम्। मनु.-७/६३**

अर्थात् सर्वशास्त्रवेत्ता संकेतादीनांप्रकृष्टज्ञाता शुद्धहृदयप्रवृत्तो दक्षः कुलीनश्च पुरुष एव दूतकार्ये-नियोक्तव्यः। दूत एव सन्धिविग्रहयोरधिष्ठाता इति-

**अमात्ये दण्ड आयत्तो दण्डेनैवयिकीक्रिया।**
**नृपतौ कोशराष्ट्रे च दूते सन्धिविपर्ययौ। मनु.-७/६५**
**दूत एव हि संधत्ते भिनत्त्येव च संहतान्।**
**दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवाः।। मनु.-७/६६**

तस्य दूतस्य कार्यान्तरमुच्यते-

**सविद्यादस्य कृत्येषु निगूढेंगितचेष्टितैः।**
**आकारमिंगितं चेष्टां भृत्येषु च चिकीर्षितम्।**
**मनु.-७/६७**

**४. गुप्तचरव्यवस्था-**

गुप्तचरसहकारेणैव राजा परान् नृपान् अधिकर्तुं शक्नोति तत्रान्यराज्यस्य गुप्तसूचनाया गुप्तचरसहकारेणैव प्राप्तेरिति। तत्र मनुस्मृतौ उच्यते यत् -

**अमाययैव वर्तेत न कथंचन मायया।**
**बुद्ध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः।।**
**मनु.- ७/१०४**

गुप्तचरसहकारेण राजा राजान्तरस्य भेदज्ञानेन स्वाधीनत्वं स्वस्य च भेदरक्षणेन स्वतन्त्रत्वमुद्घोष्यते-

**नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु।**
**गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः।। मनु.- ७/१०५**

**५. उपायाः-**

सामदामदण्डभेदा इति चत्वार उपाया राजनीति-शास्त्रस्य प्रधानभूता अवयवा वर्तन्ते तेन विना राजनीतेः सकलक्रियाकलापानामनुपयुक्तत्वादिति। आचार्यमनुना प्रोच्यते विषयेऽस्मिन्-

**एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः**
**तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः।।**
**मनु.-७/१०७**

उपायेषु सर्वप्रथमं सामोपायस्यैव क्रियाविधानं करणीयं ततो दानभेदयोरिति। यदि नायाति साफल्यं तदा दण्डमाचरेदिति-

**यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः।**
**दण्डेनैव प्रसह्यैतांश्छनकैर्वशमानयेत्।।**
**मनु.-७/१०८**

अत एव राजनीतिज्ञाः सर्वदा दण्डस्यैव प्राधान्यं मन्यमानाः सादरं दण्डस्य सर्वप्रधानोपायत्वमुद्घोष-यन्ति-

**सामादीनामुपायानां चतुर्णामपि पण्डिताः।**
**सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये।।**
**मनु.-७/१०९**

**६. षाड्गुण्यम्-**

सन्धिविग्रहादिषड्गुणा राजनीतिशास्त्रस्याधार-भूताः। तस्य विषये आचार्यमनुना प्रोच्यते-

**सन्धिं च विग्रहं चैव यानमासनमेव च।**
**द्वैधीभावं संश्रयं च षड् गुणांश्चिन्तयेत्सदा।।**
**मनु.- ७/१६०**

सन्धि: द्विविध: उच्यते तत्र-

**समानयानकर्मा च विपरीतस्तथैव च।**
**तदात्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः।।**
**मनु.- ७/१६३**

विग्रहस्य द्विविधत्वमुच्यते-

**स्वयं कृतश्च कार्यार्थमकाले काल एव वा।**
**मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः।।**
**मनु.- ७/१६४**

यानस्य द्वौ भेदौ कथितौ-

**एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।**
**संहतस्य च मित्रेण द्विविधं यानमुच्यते।।**
**मनु.- ७/१६५**

आसनस्यापि द्विविधत्वमुच्यते-

**क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा।**
**मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम्।।**
**मनु.- ७/१६६**

संश्रयस्यापि द्विविधत्वमुच्यते-

**अर्थसंपादनार्थे च पीड्यमानस्य शत्रुभिः।**
**साधुषु व्यपदेशार्थे द्विविधः संश्रयः स्मृतः।।**
**मनु.- ७/१६४**

**७. दुर्गनिर्माणम्-**

आचार्यमनुमते राज्ञः षड्दुर्गाणां व्याख्यानं करोति। तत्रोच्यते यत्-

**धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।**
**नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्।।**
**मनु.- ७/७०**

अर्थात् षड् दुर्गा भवन्ति-धन्वदुर्ग:, महीदुर्गं:, जलदुर्गं:, वनदुर्गं:, मनुष्यदुर्ग: गिरिदुर्गश्चेति। तत्र सर्वप्रधानं-भवति गिरिदुर्गमिति-

**सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।**
**एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते।। मनु.- ७/७१**

एतेषु सर्वेषु दुर्गेषु निवासाय योग्यजना एते वर्तन्ते-

**त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाऽप्सराः।**
**त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः।।**
**मनु.- ७/७२**

गिरिदुर्गस्य आश्रयेण राजा स्वरक्षां कर्तुं शक्नोति-

**एकः शतं योधयति प्रकारस्थो धनुर्धरः।**
**शतं दशसहस्राणि तस्माद् दुर्गं विधीयते।।**
**मनु.- ७/७४**

**वरिष्ठ-अध्यापकः ( संस्कृतं ), जयपुरम् ( राज. )**


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

# राजनीतिशास्त्रज्ञः कालिदासः

❑ बाबूलालः मीना
प्राध्यापकः-संस्कृत विभागः

महाकविः कालिदासः संस्कृतसाहित्याकाशस्य देदीप्यमानः सूर्यः विद्यते। सः विश्वविख्यातः काव्यस्त्रष्टा, कलिकुलगुरुः, सफलः महाकाव्यकारः, सर्वोत्कृष्टः नाटककारः सर्वश्रेष्ठश्च गीतिकाव्यप्रणेता अस्ति। सः न केवलं संस्कृतवाङ्मयस्य अपितु सकलचेतनायाः साहित्यिकसमृद्धेः एकमात्रभूतः सर्वश्रेष्ठः प्रतिनिधिः महाकविः वर्तते। सः भारतीयायाः संस्कृतेः महान् व्याख्याता विद्यते। तस्य कविता साक्षात् त्रिवेणी अस्ति। तस्यां कवित्वस्य निर्मला धारा पवित्रायाः मन्दाकिन्याः धारा एव। तस्यां भावानां कल्पनानां च गम्भीरा धारा मनोज्ञायाः कालिन्द्याः एव धारा। तस्यां विविधकलानां ज्ञानानां, नवनवोन्मेषशालिनीप्रतिभा-भूतायाः सरस्वत्याः च शुभ्रधारा विद्यते। तस्य काव्ये स्वर्गीयः आनन्दः, भौतिकः विलासः, दैवी दिव्यता, मानवीया मनोज्ञता सात्विकं सम्मोहनं च सन्ति। तस्य कथानकेषु सुविचारितं घटनासंयोजनमस्ति। तत्र बाह्यप्रकृतेः विश्लेषणेन सह अन्तः प्रकृतेः अपि सूक्ष्मं दर्शनं प्राप्यते। चरित्रचित्रणे वैयक्तिकतायाः प्राधान्यं विद्यते। शब्दचयने नीरक्षीरविवेकः दृश्यते। तद्वर्णनेषु अलंकारप्राधान्यं नास्ति अपितु नैसर्गिकसुषमायाः प्रमुखता दरीदृश्यते।

वस्तुतः कालिदासे सर्वतोमुखी प्रतिभा विद्यते। तस्मिन् अद्‌भुतकवित्वशक्तेः नवनवोन्मेषः विद्यमानो-ऽस्ति तस्य लोकप्रियतायाः मुख्यं कारणं सरला, परिष्कृता प्रसादगुणयुक्ता च शैली वर्तते। तस्यां प्रांजलता, मनोरमतायाः अकृत्रिमतायाः संकेतात्मकतायाः ध्वन्यात्मकतायाः आदर्शरूपतायाः संगीतात्मकतायाश्च सुन्दरः समन्वयः विद्यते। तस्य वर्णनानि सजीवानि सन्ति। तेषु न तु पुराणादितुल्यः अनावश्यकः विस्तारोऽस्ति, न शैथिल्यं, न वा परवर्तिभिः कविभिस्तुल्यं पाण्डित्यप्रदर्शनम्, न च दीर्घसमासः, न अलंकारभारः, न च कृत्रिमकवित्वमस्ति अपितु तद्रचनासु कवित्वस्य प्रभावः दृग्गोचरीभवति। हृद्‌गतानां भावानां मूर्तरूपे प्रकटीकरणम्, मानवहृदयस्य सूक्ष्मतमानां क्रियाणां तात्त्विकं वर्णनम्, प्रकृतेः मानवहृदयेषु प्रभावस्य सुकुमारभावानच कोमलायां भाषायाम् अभिव्यक्तिः इत्यादयः गुणाः कालिदासे प्राप्यन्ते। अतएव महाकविः कालिदासः सर्वान् कवीन् अतिशेते। सः सर्वेषु अद्वितीयः। एभिः कारणैरेव समीक्षकाः कथयन्ति-

**पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासाः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।**

महाकवेः कालिदासस्य रचनासु व्यक्तेन पाण्डित्येन ऋषीणाम् आश्रमाणां च वर्णनेन एतदनुमानं भवति यत् सः कुत्रचित् गुरुकुले एव शिक्षां गृहीतवान्। तत्रैव स अवश्यमेव संहितानाम्, ब्राह्मणोपनिषदाम्, स्मृतीनाम्, दर्शनानाम्, धर्मशास्त्रस्य, व्याकरणशास्त्रस्य, पुराणानाम्, राजनीतिशास्त्रस्य, इतिहासस्य, काव्यशास्त्रस्य, चित्रकलायाः, संगीतकलायाः, आयुर्वेदस्य, ज्योतिष-शास्त्रस्य, सामुद्रिकशास्त्रस्य, कामशास्त्रस्य, मनोविज्ञानस्य, युद्धविज्ञानस्य, वनस्पतिविज्ञानस्य, पक्षिविज्ञानस्य च इत्यादीनां शास्त्राणां विस्तृतमध्ययनं कृतवान् तथापि सोऽभिमानशून्यः आसीत्-

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**
**तितीर्षुदुस्तरं मोहादुडुपेनास्मि सागरम्।। 1**

महाकविः कालिदासः उपर्युक्तानां विद्यानां कलानां च पूर्णावगाहनेन सह अनेकेषां देशदेशान्तराणां भ्रमणमपि कृतवान्। सः निश्चयेन बहिर्जगतः सूक्ष्मनिरीक्षणेन सह अन्तर्जगतोऽपि सूक्ष्ममाकलनमकरोत्।सः शास्त्रनियमान् स्वरचनासु कुत्रचिदपि न उल्लंघितवान्। तस्य राजनीतिशास्त्रस्य ज्ञानस्य सूचकानि स्थलानि तत्कृतिषु बहूनि सन्ति, तेषां संकेतसन्दर्भानां शोधलेखगौरवात् संक्षेपेण केवलं दिग्दर्शनमत्र प्रस्तूयते।

वस्तुतः महाकविः कालिदासः राजनीतिशास्त्रस्य विशारदः आसीत्। तर्कप्रधाना राजनीतिः यदा लोकनीतिमनुसरति तदा सा राजधर्म इति उच्यते। महाकविः कालिदासः स्वग्रंथेषु राजधर्मस्य राजनीति-शास्त्रस्य वा अनेकस्थलेषु स्वसूक्ष्मज्ञानं प्रकटितवान्। राजनीतौ अपि सः सदाचारं सन्निविष्टवान्। वस्तुतः कालिदासस्य समये देशे राजतंत्रात्मकं शासनमासीत्। राजानोऽपि प्रजावत्सलाः भवन्तिस्म।ते मुनीनां विदुषां च समादरं कुर्वन्तिस्म। यद्यपि राज्ये राजादेशः एव सर्वमान्यः सर्वोपरि च भवतिस्म तथापि राज्ञामुपरि अमात्यानां पुरोहितानां विदुषां ब्राह्मणानां च नियंत्रणम् भवतिस्म अवएव तत् पूर्णतः व्यवहारिकदृष्ट्या लोकतन्त्रमेव आसीत्। महाकविः कालिदासः राजनीतिज्ञानविषये स्मृतिभिः प्रभावितोऽऽभूत्। नृपस्य कर्तव्यमस्ति यत् सः प्रजाः क्षतेः त्रायेत –

**क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।**
**राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा।।**[2]

सर्वदा प्रजारंजनं स कुर्यात्–

**यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा।**
**तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात्।।**[3]

नृपस्य कर्तव्यमस्ति यत् सः प्रजाहितार्थं कष्टानि सहेत– **स्वसुखनिरभिलाषः**4 शासनप्रबन्धे प्राप्तानि कष्टानि सहेत– **औत्सुक्यमात्रमवसाययति प्रतिष्ठा**[5] सः सर्वदा प्रजारक्षणं कुर्यात्– **राजरक्षितानि तपोवनानि**[6] **आपन्नस्य विषयनिवासिनो जनस्य**[7]। सः प्रजाहितार्थं दुष्टान् पीडयेत् शान्तिं च स्थापयेत्– **'नियमयसि विमार्गप्रस्थितानात्तदण्डः'**[8] प्रजाः स्वसन्तति[व] अवगच्छेत्– **प्रजाः प्रजाः स्वा इव**[9]। शासनप्रबन्धे कदाचित् शिथिलतां न कुर्यात्। यद्यपि एतदर्थ राजा शान्तिं न आप्नोति– **अविश्रमोऽयं लोकतन्त्राधिकारः**[10] राज्ञः कर्तव्यानि स वर्णयति यत् विपत्तौ अपि सः न्यायधर्मानुसारं राज्यकार्ये संलग्नः स्यात्। राजा दुष्यन्तः शकुन्तलाविषयकपरिणयस्मरणवृतान्तेन दुःखितो भूत्वा वसन्तोत्सवं रुणद्धि परन्तु स्वकर्तव्यानि न विस्मरति–

**येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।**
**स स पापादृते तासां दुष्यन्त इति घुष्यताम्।।**[11]

राज्ञः अस्याम् आज्ञायां तस्य शोकः, धर्मज्ञानम्, कर्तव्यस्य, स्नेहस्य, वर्तमानस्य अतीतस्य च अपूर्वः, संयोगोऽस्ति।राजा सदैव प्रजाहिते तत्परः स्यात्–

**प्रवर्ततां प्रकृतिहिताय पार्थिवः**[12]

राजा निर्भीकः धर्मपरायणः निर्लोभी च स्यात्।[13] सः धर्मानुसारं अर्थकामयोः उपार्जनं सेवनं च कुर्यात्।[14] तस्य राज्यं चौर्यविहीनं स्यात्।[15] सः पृथिवीं धनधान्यपूर्णां कर्तुं प्रयत्नं कुर्यात्।[16] राजा सज्जनानां मित्रं दुष्टानां च शत्रुः भवेत्।[17] कालिदासस्य दृष्टौ राजा स्वराज्यं तपोवनं मत्वा तस्मिन् उषित्वा प्रजापालनरूपतपः कुर्यात्।[18] मालविकाग्निमित्रे मन्त्रिपरिषदः उल्लेखः प्राप्यते। राजा वैदेशिकनीतिसम्बद्धे स्वनिर्णये तदनुमोदनम् इच्छति।[19] वनगमनात् पूर्वं राजा स्वशासनभारं सचिवेषु समर्पयतिस्म। यदा सः पुनरागच्छतिस्म तदा स स्वयमेव शासनभारं गृह्णाति स्म।[20] रघुवंशे तृतीये सर्गे अष्टमे सर्गे च

क्रमशः शक्तित्रय-षड्गुणादीनां पारिभाषिकशब्दानां प्रयोगाः प्राप्यन्ते।[21] महाकविः स्मृतिप्रोक्तस्य राजधर्मस्य उपयोगं कृतवान्। रघुवंशे राज्ञः दिलीपस्य, रघोः, अजस्य, दशरथस्य अतिथेः च राजनीतिवर्णनानि स्मृतिवचना-धारितानि एव सन्ति। यथा मनोः महर्षेः-

**'नाक्षत्रं ब्रह्म भवति क्षत्रं नाब्रह्म वर्धते।**
**ब्रह्मक्षत्रे तु संयुक्ते इहामुत्र च वर्धते।[22]'**

अस्य वचनस्य आधारे कालिदासः कथयति यत्-

**स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रिया।**
**पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा।।[23]**

मनुप्रोक्तनियमानुसारमेव राज्ञः दिलीपस्य प्रजाः आचरणं कुर्वन्तिस्म।[24] धर्मशास्त्रनियमानुसारं निःसन्तानस्य मनुष्यस्य सम्पत्तिः राजकोशे एकत्रिता भवति स्म।[25] राजा रात्रौ दिवसे च भिन्नभिन्नविभागेषु कथं दिनचर्याम् आचरेत्- अस्मिन् विषये राजा अतिथिः अर्थशास्त्रकारनिर्धारितनियमानुसारं दिनचर्यां यापयति स्म।[26] नववृक्षवत् नवीनं राजानं पराजितं कर्तुं सरलमस्ति ईदृशं गहनं राजनीतिज्ञानम् अत्र महाकविना कालिदासेन प्रकटितम्-

**अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढ़मूलत्वात्।**
**नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम्।।[27]**

रघुवंशिनः राजानः न केवलं स्वयं राजनीतौ कुशलाः सन्ति।[28] अपितु स्वसन्ततिमपि राजनीतेः चत्वारि अंगानि आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च शिक्षयितुं दक्षाः, तदा एव तु कुशः स्वपुत्रे अतिथिविषये इत्थमेव कृतवान्-

**तमादौ कुलविद्यानामर्थमर्थविदां वरः।**
**पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता।[29]**

कालिदासस्य राजनीतिः ईदृशी वर्तते यत् राजा दुष्यन्तः गान्धर्वविवाहं कृत्वा शापवशात् शकुन्तलां विस्मरति तदर्थं अन्ते स्वयमात्मानं दण्डयति, वस्तुतः अयमेव राजधर्मः लोकतन्त्रात्मकः। अपराधस्य प्रकृत्यनुसारं दण्डनीतेः प्रयोगः।[30] वक्रराजनीतेः ज्ञातापि धर्मात्मा रघुः सरलां नीतिं स्वीकरोति।[31] षड्विधां सेनां गृहीत्वा, रघोः दिग्विजयाय प्रस्थानम्[32] राजनीतिदृष्ट्या सेनायाः चतुर्विधं विभाजनम्[33] शत्रुविनाशं कृत्वा मार्गकष्टानां दूरीकरणम्[34] धर्मार्थकामैः सह साम्रः समानः व्यवहारः[35] इत्यादीनि स्थलानि महाकवेः कालिदासस्य गूढराजनीतिविषयकस्य ज्ञानस्य परिचायकानि सन्ति। राजनीतौ सः सामदाम-दडभेदरूपान् उपायान् प्रयोजयेत्-

**धृतातपत्रो भरतेन साक्षादुपायसंज्ञात इव प्रवृद्धः।[36]**

एवमेवान्यत्रापि चतुर्विधानाम् उपायानां वर्णनं प्राप्यते।[37] राजनीतौ कूटयुद्धमपि अपरिहार्यं भवति। कूटनीतिं कूटयुद्धमपि च यथासमये सः व्यवहरेत्-

**कूटयुद्धविधिज्ञेऽपि तस्मिन् सन्मार्गयोधिनि।**
**भेजे अभिसारिकावृत्तिं जयश्रीर्वीरगामिनी।[38]**

कालिदासः मनुते यत् काले प्रयुक्ता कूटनीतिः निश्चयेन अग्रे गत्वा फलवती भवति-एतत् तस्य राजनैतिक्याः चेतनायाः परिचायकमस्ति-

**काले खलु समारब्धाः फलं बध्नन्ति नीतयः।[39]**

एवमेव अन्यत्रापि कूटनीतेः वर्णनं प्राप्यते।[40] कुमारसंभवेऽपि शुक्रनीतेः स्पष्टत्वेन उल्लेखः प्राप्यते।[41] संक्षेपे, उपर्युक्तैः एभिरुद्धरणैः गूढं प्रौढं वा तद्राजनीतिविषयकं ज्ञानं प्राप्यते। तेन सिद्ध्यति यत् महाकविः कालिदासः राजनीतिशास्त्रस्य महान् ज्ञाता आसीत्। राजनीतिः स्वयमेव धर्मः। वस्तुतः महाकविः कालिदासः आदर्शराज्यव्यवस्थायां विश्वसितिस्म,

अतएव सः अभिलषतिस्म यत् राजनीतिः धर्मनियन्त्रिता भवेत्। वस्तुतः महाकविः कालिदासः धर्मविहीनां राजनीतिं न स्वीकरोतिस्म। वर्णाश्रमधर्मस्य मर्यादा-पालकस्य राजधर्मस्य व्याख्यातुश्च महाकवेः कालिदासस्य दृष्टौ धर्मस्य राजनीतेश्च इदमेव वैशिष्ट्यम्।

**सन्दर्भाः-**

1. रघुवंशम्, 1/2, 2. रघुवंशम्, 2/53, 3. रघुवंशम्, 4/12, 4. अ.शा., 5/7, 5. अ.शा., 5/6, 6. अ.शा., प्रथमे अके, 7. अ.शा., तृतीय अंके, 8. अ.शा., 5/8, 9. अ.शा., 5/5, 10. अ.शा., पंचमे अंके, 11. अ.शा., 6/23, 12. अ.शा., 7/35, 13. रघुवंशम्, 1/21, 14. रघुवंशम्, 1/25, 15. रघुवंशम्, 1/27, 16. रघुवंशम्, 1/26, 17. रघुवंशम्, 1/28, 18. रघुवंशम्, 1/58 19. मालविकाग्निमित्रम्, पंचमः अंकः, 20. रघुवंशम्, 2/74, 21. रघुवंशम्, 3/13, 8/9, 21, 22. मनुस्मृतिः, 9/22, 23. रघुवंशम्, 8/4, 24. रघुवंशम्, 1/17, 25. अ.शा., षष्ठे अंके, 26. रघुवंशम्, 17/47, 49, 27. मालविका-ग्निमित्रम्, 1/8, 28. रघुवंशम्, 14/21, 29. रघुवंशम्, 17/3, 30. रघुवंशम्, 4/8, 31. रघुवंशम्, 4/10, 32. रघुवंशम्, 4/26, 33. रघुवंशम्, 4/30, 34. रघुवंशम्, 4/33, 35. रघुवंशम्, 14/21, 36. रघुवंशम्, 14/11, 37. रघुवंशम्, 11/55, 17/68, 38. रघुवंशम्, 17/69, 39. रघुवंशम्, 12/69, 40. रघुवंशम्, 8/9, 41. कुमारसंभवम्, 3/6.

एम.एस.जे. राजकीयः स्नातकोत्तरः महाविद्यालयः
भरतपुरम् (राजस्थानम्)

---

# कुरु श्रमम्

❑ डॉ. भूपेन्द्रकुमारराठौरः, कोटा

**पिपीलिका गच्छन्ती,**
**कथयति भगिनी।**
**चरैवेति-चरैवेति नित्यमेव,**
**पन्थाः अस्ति जीवनस्य दुर्गमः।**
**कुरु श्रमं, कुरु श्रमम्।। 1।।**

**पिपीलिका गच्छन्ती,**
**पुनः वदति।**
**लक्ष्यन्तु दृढं जीवने तु,**
**तस्य प्राप्तिः निश्चितमेव।**
**जीवनस्य निर्माणे हि,**
**कुरु श्रमं, कुरु श्रमम्।। 2।।**

**पिपीलिका गच्छन्ती,**
**पुनः वदति।**
**ईशोपनिषदि वर्णितम् अस्ति,**
**कुर्वन्नेवेह कर्माणि,**
**जिजीविषेच्छतं समाः।**
**जीवनेऽस्ति श्रमस्य महत्वं,**
**कुरु श्रमं, कुरु श्रमम्।। 3।।**

**पिपीलिका गच्छन्ती,**
**पुनः वदति।**
**लक्ष्यप्राप्तिं विना,**
**न विश्रामो, न विश्रामः**
**ईश्वरस्तस्मै ददाति आशीर्वादम्,**
**यः करोति परिश्रमं सदा।**
**अतः भगिनि,**
**कुरु श्रमं, कुरु श्रमम्।। 4।।**

# वैदिकसाहित्ये भारतीयसंस्कृतिः

❑ डॉ. सरोजकुमारपाढी
सहायक-आचार्य,

भारतीयसंस्कृतिः मूलतः वैदिकसाहित्यमाधारी-कृत्य प्रवर्त्तते। वैदिकसाहित्यमिति कथनेन वेदसंहिताब्राह्मणा-रण्यकशिक्षा-कल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि गृह्यन्ते। समाज-शास्त्रम्, आचारशास्त्रम्, अर्थशास्त्रं सर्वेषां दृष्ट्या वैदिकसाहित्यस्य भूमिका अन्ताराष्ट्रियक्षेत्रे अतीव महत्वपूर्णा विद्यते। विश्ववासिनामेकताऽभिन्नताविषये वैदिकसाहित्ये चर्चाबाहुल्यं प्राप्यते। तद्यथा-

1. समानो मन्त्रः समितिः समानी। (ऋ. 10.191.3)
2. मित्रस्य चक्षुषा समीक्षामहे। (यजु. 36/18)
3. एकं सद् विप्रा बहुधा वदन्ति।
4. एको देवः सर्वभूतेषु गूढः।
5. अयं मे हस्तो भगवान्। (अथर्व. 4/13/6)
6. द्यौः नः पिता जनिता नाभिरत्र बन्धुः मे माता पृथिवी महीयम्। (ऋ. 1/164/33)
7. द्यौः वः पिता पृथिवी माता सोमो भ्राताऽदितिः स्वसा। (ऋ. 1/191)
8. अयमात्मा ब्रह्म। (बृह. 2/5/19)
9. सर्वं खल्विदं ब्रह्म। (छा. 3/14/1)
10. अहं ब्रह्मास्मि। (बृह. 1/4/10)
11. यं मे नाभिरिह मे सध्यस्थाम्। (ऋ. 10/61/19)
12. इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परूष्णिया असिक्न्या मरूद्वृद्धे वितस्तयार्जिकीये शुणुह्यासुषमया।।
13. मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, मित्रस्य चक्षुषा समीक्षामहे। (यजु. 36/18) ऋग्वेदस्यान्तिममन्त्रोपि संहति भावनां प्रेरयति यथा-

**समानी वः आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**

यजुर्वेदे पृथिवी माता इति वर्णिता अस्ति। मातरं प्रति सन्ततीनां अहैतुकी प्रीतिः यथा भवति तथा पृथिवीं प्रति तदधिवासिनाम् इति। यथा-

सूक्ष्मा चासि विश्वचासि स्योना चासि सुड्डदा चास्यूर्ज स्वती चासि पयस्वती च पुराक्रूरस्य विसृपो विरप्षिन्नुदादाय पृथिवी जीरदानुम्। (यजु. 36/48)

एतैः श्रुतिवचनैः प्रमाणितं भवति- यः कोऽपि देशीयो विदेशीयो वा भवतु नाम सर्वे एकस्यैव परमात्मनः पुत्राः। 'एकस्यां बहुस्यामपि प्रजायत' इति यजुर्वेदवचनानुसा-रमीश्वरेण सृष्टमिदं जगद्, युदुक्तम् ईशोपनिषदि-

**ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत्।**
**तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम्।। (ई.उ.1)**

पुनः सचराचरपृथ्वी मम माता अहं तव पुत्र इति अथर्ववेदः प्रतिपादयति यथा "माता भूमिः पुत्रोऽहं पृथिव्याः" (अथर्व-12/1/12)। पुनश्च यज्ञप्रधान-वेदशास्त्रेषु यज्ञप्रक्रियाया एतदेव महत्वं यत् तत्र स्वार्थपरिहारपूर्वकं परार्थसाधना शिक्ष्यते। स्वाहा इति शब्देन सर्वथा स्वार्थस्य त्यागः, इदं न मम इत्यादिभिः पदैः स्पष्टमवगम्यते। स च यज्ञः विश्वशान्त्यर्थं सहायको भवति। अस्मिन् लोके जनाः साम्प्रदायिक-प्रान्तीय-भाषा-राष्ट्रियता-धर्मविकारभूतेषु विषयेषु कलहं कुर्वाणाः दृश्यन्ते अपि च ईर्ष्या, द्वेषः, घृणा चेत्यादि दुर्भावनाः मनसि उत्पद्यन्ते। एतादृश-परिस्थितौ केवलं अभेददृष्ट्या एव तस्य समाधानं भवितुमर्हति। अभेददृष्ट्या जगदिदं स्वर्गमिव प्रतीयते। न तत्र शोकमोहा-देरवसरः नापि तत्र विजुगुप्साविचिकित्सयोर्वा। एतदेव ईशोपनिषदि स्पष्टं ज्ञायते यथा-

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।। ई.उ. (6)
यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।। इ.उ.(7)

अन्यश्रुतिष्वपि राष्ट्रियभावना सम्यग्द्योतते यथा-

"अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः"(अथर्व-3/5/2)।
"अहमुत्तरोऽसनि" (अथर्व-3/5/5)
"अहं भूयासमुत्तमः" (अथर्व- 6/15/2)
"वयं राष्ट्रे जागृयाम पुरोहिताः" (यजु-1/34)
"राष्ट्रं च रोह द्रविणं च रोह" (अथर्व-13/1/34)
"निकामे निकामे नः पर्जन्यो वर्षतु" (यजु-22/22)
"कृण्वन्तो विश्वमार्यम्" (ऋ-9/63/5)

अथर्ववेदेऽपि राष्ट्रियभावनासम्बलिताः विचाराः तत्र तत्र दृश्यन्ते तद् यथा-

सपत्यक्षयणो वृषभो राष्ट्रो विङ्घासाहि:।
यथामहमेषां वीराणां वीराजानि जनस्य च (अथर्व 1/29/6)

अथर्ववेदे क्वचित् राष्ट्रानुरागस्य एवमुद्देश्यं दृश्यते यत् धेनोः स्ववत्सां प्रति यथा सहजा प्रीतिः तथैव जनानां स्वराष्ट्रप्रीतिरिति। तद्यथा-

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः
अन्यो अन्यमभिहर्यत वत्सं जातामिवाध्न्या। इति (अथर्व 3/30/1)

मानवः न केवलं पराभौतिकविग्रहः अपितु आत्म-विशिष्टविकसितविवेकशीलसंवेदनात्मकसमदर्शनप्राणि-विशेषोऽपि विद्यते। अत एव आत्मनि सर्वभूतानि द्रष्टव्यानि, सर्वभूतेषु चात्मा द्रष्टव्य इति भगवद्गीतावचनेन स्पष्टं भवति।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।। (भ.गी. 6/29)
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः।। (भ.गी. 6/32)
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ।। (भ.गी. 3/21)
उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम्।
सङ्करस्य च कर्त्तास्यामुपहन्यामिमाः प्रजाः।। (भ.गी. 3/23)

एतादृशी भावना मानवसमाजस्य भावनात्मकैकतायाः अभिवर्धनार्थं प्रेरणास्रोतत्वेन विलसति। मनुना कथितम्-

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।

सुराष्ट्रस्य वर्णनं मनुस्मृतौ अपि सम्यगुपलभ्यते। यथा-

राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते।। (म.स्मृ 7/113)
निर्भयं तु भवेदस्य राष्ट्रं बाहुबलाश्रितम्।
तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः।। (म.स्मृ 9/255)
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः।। (म.स्मृ 7/110)

राष्ट्रभावनाविषये महाभारते एवं लिखितमस्ति यत्-
अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठति-म.भा. शान्ति 67/3

शतपथब्राह्मणेऽपि "आत्मयाजी श्रेयान् देवयानिः" इत्येवमुद्घोष्यते। आत्मनः प्रतिकूलानि परेषां न समाचरेत् इत्ययं शाश्वतिक-सिद्धान्त इममध्यात्मवादमाधारीकृत्यैव मानवता-मुद्बोधयति। अस्याः भावनायाः मूलाधारोऽस्ति आधिभौतिक-वादेन सह अध्यात्मवादस्य समन्वयः सन्तुलनं सामारस्यं च। अस्मिन् समन्वयात्मके आधारस्तम्भे भावनात्मकैकता सुदृढा भवति।

इदानीन्तनसमाजे श्रुतिवाक्यानि विभिन्नासु आधुनिकसंस्थासु ध्येयवाक्यत्वेन तस्याः संस्थायाः सम्मानं वर्धयन्ति। तानि वाक्यानि यथा-

आकाशवाण्याः- "बहुजनहिताय वहुजनसुखाय"
दूरदर्शनस्य- सत्यं शिवं सुन्दरम्
स्वास्थ्यसेवायाः - सर्वे सन्तु निरामयाः
जीवन बीमा निगम संस्थायाः - योगक्षेमं वहाम्यहम्
जलसेनायाः - शं नो वरुणः
वायुसेनायाः-नभः स्पृशं दीप्तम्
न्यायालयस्य - सत्यमेव जयते
दूरवाण्याः- अहर्निशं सेवामहे
विदेशविभागस्य-पराषीलम् इत्यादयः
भारतीयसंसदः-अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्वकम्।।

एवं विविधानि आदर्शवाक्यानि एवमेव अन्यैरपि प्रशासनिकविभागैः स्वीकृतानि, तानि आदर्शवाक्यानि वेदेषु तथा च वेदानुगामि स्मृतिषु प्रतिपादितानि सन्ति।

अपि च वेदे राष्ट्रकल्याणभावनापि दरीदृश्यते यथा-

"आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्-वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्। यजुः (22/22)"

अस्मिन् मन्त्रे ऋषिः कामयते अस्माकं राष्ट्रे ब्राह्मणक्षत्रियादयः स्वकर्मण्यभिरताः स्युः गावो मधुरदुग्धवत्यो वृषभाश्च बलशालिनो भवन्तु ओषधयः फलवत्यो भवन्तु। अस्माकं योगक्षेमश्च सर्वतः सिद्धौ भवेताम् इति श्रुतिषु राष्ट्रकल्याणभावना विद्यते।

एतावता परिशीलनेन निश्चयेन वक्तुं शक्यते श्रुतिस्मृत्यादयः सर्वथा राष्ट्रियभावनायाः परिचायिकाः सन्ति। श्रुति-स्मृतिषु तत्र तत्र भ्रातृभावना, मैत्रीभावना, राष्ट्रकल्याणभावना अपि च पर्यावरणचेतनायाः विषये अभिप्रेरणात्मकानि वाक्यानि उपलभ्यन्ते।

**वैदिकदर्शनविभागः संस्कृतविद्या धर्मविज्ञान संकायः**
**का.हि.वि.वि., वाराणसी-221005**

पत्रकारतासमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# वर्धते पत्रकारितासाहित्यम्

भारतस्य सांस्कृतिकसञ्जीवनी संस्कृतभाषा सुस्पष्ट-मजरामराऽस्ति, वेदेषु वर्णिता उषा इव ''पुराणी युवति''- रस्ति, सहस्राब्दीभ्योऽस्यां ग्रन्था विलिख्यन्ते, काव्यरचना: क्रियन्ते, विदुषां शास्त्रचर्चा जायन्ते इत्यादि सुविदितं विश्वे। युगानुरूपमियं नूतनानि परिधानानि परिदधातीत्यपि विशिष्योल्लेखनीयं तथ्यम्। यदवधि भारते ''पत्रकारता'' समारब्धा, संस्कृतेऽपि पत्रिकाप्रकाशन-मारब्धम्। 1866 वर्षतस्तु संस्कृतपत्रकारिताया: सुस्पष्टमभिलिखित इतिहास: सुरक्षितोऽस्ति योऽनुदिनं पुष्टिमारोहति। पत्रेषु मुद्रितानि वृत्तानि लेखांश्च संगृह्णन्ती पत्रकारिता गतेन शताब्दीद्वयेन दृष्टाऽभूत् किन्तु यदवधि सञ्चारमाध्यमीया पत्रकारिता प्रारब्धा, आकाशवाण्या, दूरदर्शनेन च वार्ताप्रसारणादिकमारब्धम्, परिचर्चा-काव्यपाठादि प्रसारणानि प्रारब्धानि, तदनु संस्कृतेऽपि रेडियोरूपकाणि, वार्ताश्च प्रासार्यन्त, प्रायोऽर्धशताब्दी-पूर्वतो नियमित ''समाचार'' प्रसारणमाकाशवाण्यां प्रारब्धं, दूरदर्शनेनाऽपि। यदवधि डिजिटलविज्ञानेन विश्वे अभिकलित्रप्रयुक्तस्य साहित्यस्य संग्रह आरब्ध:, ''अन्तर्जाल'' भाण्डागारेण वाङ्मयस्य संरक्षणं प्रारब्धं, संस्कृतवाङ्मयस्य समग्रोऽपि निधि: वेदोपनिषत्पुराण-काव्यादीन्यारभ्य संस्कृतपत्रपत्रिकादीनां वाङ्मयमपि अभिकलित्र (कम्प्यूटर) विद्यया संरक्षितमक्रियत। अद्य सर्चएंजिन (अन्वेषणयन्त्र) माध्यमेन समग्रस्य संस्कृतवाङ्मयस्य परिशीलनं कर्तुमर्हन्ति भवन्त:। इत्थमेव अभिकलित्रपत्रकारतान्तर्गतं ''वेबजर्नल'' इत्याख्या पत्रकारताऽपि संस्कृते समुपलब्धाऽस्तीति जानन्ति नूतना विपश्चित:। सारल्येनान्वेष्टुं शक्या सा।

इत्थं हि संस्कृते पत्रकारिताया: प्रसारस्य समीक्षणं यदि क्रियते तर्हि स्पष्टीभविष्यति यत् संस्कृत-पत्रकारताया: स्तम्भचतुष्टयमद्यत्वे द्रष्टुं शक्यते। सुधर्मा संस्कृतवाणी प्रभृति वृत्तपत्राणि नाधिकानि किन्तु कविता-कथा-गद्यलेखादि-प्रसारकाणि मासिक-त्रैमासिकादिपत्राणि ''सर्जनात्मक'' पत्रकारताया: प्रमुखस्तम्भरूपेण परिगणनीयान्येव। तेषामपि साधीयसी संख्याऽस्त्यद्य देशे। बेंगलूरूत: प्रकाश्यमानं ''**सम्भाषण सन्देशं**'' प्रारभ्य जयपुरीयां ''**भारतीं**'' साहित्य अकादमी (दिल्ली) मुखपत्रिकां **संस्कृतप्रतिभां समावेश्य गुर्जरोत्तरप्रदेशाद्यञ्चलेभ्यो या: पत्रिका: प्रकाश्यन्ते कथासरित्** प्रभृतय: पत्रिका अपि, तासां परिचयोऽस्माभि: समये समये संक्षिप्य समर्प्यत एव पाठकेभ्य:। अयं प्रमुखो वर्ग:।

अन्य एक: प्रकार: अलिखिताया अमुद्रितायाश्च प्रसारमाध्यमीयपत्रकारिताया अस्ति। अस्यां प्रमुखत आकाशवाणीत: प्रत्यहं द्वि: प्रसार्यमाणा: संस्कृतवार्ता:, प्रायोऽर्धशताब्दीतिहासं निर्मास्यन्ति। प्रात: सप्तवादनात् पञ्चनिमेषपूर्वं (6-55) सायं षड्वादनानन्तरं दशनिमेषो-परि (6-10) संस्कृतवार्ता: प्रसार्यन्ते। दूरदर्शनत: प्रात: सप्तवादनात् पञ्चनिमेषपूर्व दृश्यावल्या सह संस्कृतवार्ता: प्रसार्यन्ते। गतवर्षतो दूरदर्शनेन प्रतिसप्ताहं शनिवासरे ''वार्तावली'' नाम्ना संस्कृत-समाचार-परिचर्चा-शिक्षा-प्रतियोगितादिकं समावेश्य य: कार्यक्रम: प्रसार्यते, रविवासरे च पुन: प्रसार्यते तेनाऽपि नूतना: पन्थान: प्रदर्शिता:। संस्कृताध्यापकाश्-छात्राश्च यदि कार्यक्रमानेतान् शृणुयु: पश्येयुश्च-नि:सन्देहं तेषां संस्कृताभ्यास: परिमार्जितो भवेदित्यहं प्रायो निवेदयामि।

तृतीय: प्रकारोऽस्ति वेबजर्नलनाम्नाऽभिधेयाया: पत्रकारिताया यत्सम्बन्धे प्रारम्भेस्माभिर्विवरणमुल्लिखित-

मेव। चतुर्थः प्रकारोऽस्ति शोधपत्रिकाणां यासां सुमहती संख्या गतशताब्दीद्वये प्राकाशि यासां च सुस्पष्टं महत्त्वमस्ति शास्त्रीयवाङ्मयेतिहासवंवर्धने। यद्यपि शोधपत्रिकाः शास्त्रीयवर्गीयाः परिगण्यन्ते, पत्रकारितायाः परिवारे सामान्यतस्तासां परिगणनं न क्रियते किन्तु पीरियोडिकल (सामयिक-प्रकाशन) वर्गे तासां गणना भवतीति संस्कृतेतिहासे तासां मूर्धन्यं स्थानमस्त्येव। एवं-विधानां शोधपत्रिकाणां सुमहती संख्याऽस्ति भारते। पञ्चदशाधिकसंस्कृतविश्वविद्यालयेभ्यस्तादृश्यः शोध-पत्रिका मुखपत्ररूपेण प्रकाश्यन्ते इति तु स्वाभाविकमेव किन्त्वन्येषामनेकेषां विश्वविद्यालयानां संस्कृतविभागा अपि स्वकीयाः शोधमुखपत्रिकाः प्रकाशयन्ति। काशीहिन्दुविश्वविद्यालयीयप्राच्यविद्यासङ्कायस्य शोध-पत्रिकाऽस्ति ''संस्कृतविद्या''। वाराणसेयसंस्कृत-विश्वविद्यालयीया ''सारस्वती सुषमा'' सुपरिचितैव। दिल्लीस्थराष्ट्रिय संस्कृतसंस्थानस्य ''संस्कृतविमर्शः'' तथैव लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य ''शोधप्रभा'' ऽपि त्रैभाषिकी त्रैमासिकी च शोधपत्रिकाऽस्ति। अस्या अभिनवगुप्ता-चार्यसहस्राब्दी विशेषाङ्कः (अक्टूबर 2016) तदनन्तरं प्रकाशितः जनवरी 2017 अङ्कश्च सपद्येवाऽस्माभि-र्लब्धः।

जयपुरस्थ जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-विश्वविद्यालयस्य शोधपत्रिकाया नामाऽस्ति ''वयम्'' इति। इयमपि त्रैभाषिकी पत्रिकाऽस्ति, दशाधिकवर्षे-ष्वस्या 18 अङ्का प्रकाशिताः। अस्या अप्यङ्कद्वयं सपद्येव प्रकाशमाप्तं यस्य लोकार्पणं विशिष्टव्याख्यानसमारोहे एकस्मिन् समजनि। प्रयागस्थ गङ्गानाथझाशोधकेन्द्रत्वेन प्रसिद्धो राष्ट्रियसंस्कृतसंस्थानपरिसरः स्वकीयां शोध-पत्रिकामनेकेभ्यो वर्षेभ्यः प्रकाशयति। जयपुर-परिसरेणापि **जयन्ती** शोधपत्रिका प्रकाश्यते। राजस्थान-संस्कृतशिक्षा-निदेशालयेनापि संस्कृतदिवसावसरे ''श्रावणी'' पत्रिका प्रकाश्यते, जयपुरस्थमहाराज-संस्कृतकालेजेनाऽपि **वैजयन्ती** पत्रिका प्रकाश्यते। भारतस्य राज्ये राज्ये नगरे नगरे संस्कृतशिक्षासंस्थानानि कार्यरतानि सन्ति। तेषु बहूनां शोधपत्रिका अपि प्रकाश्यन्ते, कामं ताः संस्कृते भवन्तु, हिन्द्यामाञ्चलीय-भाषायां वा भवन्तु आङ्गल-भाषायां वा या विश्वजनीना भाषेति मन्यन्ते बहवः। होशियारपुरस्थवेदशोध-संस्थयाऽपि शोधपत्रिका-प्रकाशनं बहोः, कालात् क्रियमाणमस्तीति विदन्त्येव विपश्चितः। जयपुरादपि बहुभिः प्रकाशकैः शोधपत्रिकाः प्राकाश्यन्त, यासां परिचयोऽस्माभिः समये समये कारितोऽभूत्। ''रचनाविमर्शः'', ''सरस्वतीसौरभम्'', ''वेदाङ्गवाणी'' प्रभृतिनामधारिण्यः शोधपत्रिकाः संस्कृते हिन्द्यां च विविधानि शोधपत्राणि प्रकाशयन्ति स्म जयपुरनगरीतः। श्रीदादूमहाविद्यालयसदृशैः संस्कृत-शिक्षाकेन्द्रैरपि समये समये ''भावाञ्जलिः'', ''ज्ञानाञ्जलिः'' इत्यादिनामधारिण्यः शोधपत्रिकाः शोध-लेखसंग्रहा वा प्रकाश्यन्ते।

जयपुरनिकस्टथया शाहपुरोपनगरस्थया राजस्थान-ग्रामोत्थान एवं संस्कृतअनुसन्धान संस्थानाख्यया संस्थया ''साहित्यमन्दाकिनी'' नाम्नी शोधपत्रिका प्रकाश्यते यया प्राचीनभारते विधि-न्याय-व्यवस्था कीदृशी बभूवेति विषयमवलम्ब्य विदुषां शोधलेखान् प्रस्तुवन् विशेषाङ्कः सपद्येव प्रकाशितोऽस्ति।

एवंविधानां शोधपत्रिकाणामाकलनं परिगणनं च नूनं दुःशकमेव। अत्र हि केवलमिदमेव प्रतुष्टूषितं यत् संस्कृतभाषानिबद्धे वाङ्मयपूगे एवंविधायाः पत्र-कारिताया इमे विविधाः प्रकारा नूनं महत्त्वं बिभ्रति, एतेषां हि परिगणनं साहित्येतिहासकाराणां प्रमुखं कर्तव्यं किन्तु ग्रन्थगणनापरैः साहित्येतिहासकारैर्मन्ये न लभ्यते तावानवसरो यदेवंविधस्य साहित्यस्याप्याकलनं क्रियेत।

# दत्तन्न राष्ट्राय किम्

❑ डॉ. रामनारायण झा
महाकविः जयपुर

शून्य ज्योतिरिदं गुरुत्वमहिमा यानं नभोमण्डले,
ह्यध्यात्मं प्रतिभूतिभूषणमहो सोमात्मकञ्चौषधम्।
साहित्योपमसंविचारसरणिः सत्येत्यशोच्या मतिः,
वन्द्यं योगमतं समस्तगणितं दत्तन्न राष्ट्राय किम्।।1।।

दानं यज्ञविधौ तपश्श्रमपथे बुद्धौ विवेकौषधिः,
सन्न्यासो वृजिनात् क्रिया विधिवती शास्त्रं जनानां हृदि।
मन्त्रोऽमोघमयोऽस्त्रविविधिप्रक्षेपणा संसृतिः।
संस्कारो महतां महामधुरधुक् दत्तन्न राष्ट्राय किम्।।2।।

रश्मी रश्मिकरस्सुधारसददो ज्योत्स्ना नभो जाह्नवी,
पक्षो माससमे दिनो षड्ऋतुर्मेघो कृषिः कर्षणी।
वर्षेरम्मददेवमानवमनो-बुद्धि प्रकाशास्तमो,
मायामोक्षसुभाषहासरतयो दत्तन्न राष्ट्राय किम्।।3।।

धर्मः कर्ममयश्च शर्म सुहितं नर्म प्रतिमानवं,
चर्म प्रेष्ठगुणान्वितम्प्रतिगतं वर्म प्रतिष्ठापकम्।
आचारो रुचिरोऽतिथिस्सुरनिभो माता गरिम्णा गुरुः,
मित्रं पुत्रसमं कलत्रविभवो दत्तन्न राष्ट्राय किम्।।4।।

गद्यं पद्यमनोहरं सुकविता काव्यं कविः कान्तिका,
शृंगारस्सुरतो विलासवनिता भोगो विधिप्राणितः।
नाट्यं नाटकवाद्ययन्त्रलसितं श्रोत्राय शीधूलयः,
हारश्चारुतरो नटः प्रतिनटो दत्तन्न राष्ट्राय किम्।।5।।

छन्दो व्याकरणञ्च वैद्यकमिदं कल्पश्च शिक्षा अमी,
नैरुक्तं षट्छास्त्रमाशुमतिदं षड्दर्शनं वास्तिकम्।
सन्तोषश्शुचिता दमश्शमदुघामाचारविद्या सतां,
नो हिंसा मुदिता कृपाथ करुणा स्वाहाशु राष्ट्राय नः।।6।।

कृण्वन्तोऽखिलविश्वमार्यमिति यद् राष्ट्रे वयं सर्वथा,
वाक्यं यन्ननु ''सत्यमेव जयते'' विश्वाशु मार्गे दृशम्।
ध्येयं पूज्यपुरोहिताः सृतिविधौ ज्ञेयं जनैस्सर्वदा,
नेयं चेतसि जागृयाम मधुदं स्वाहाशु राष्ट्राय मे।।7।।

एकं सद्म यतोऽथ विश्वमखिलं गीतन्ततश्चेतरत्,
रत्नव्रातमनेकवाक्यमशितं सारं मया गीयताम्।
उत्थातव्यमिमाँल्लभस्व नर रे! नित्यं वरान्मानसान्,
जागर्तव्यमनेकधोदितमिदं श्रोत्रैश्च सम्पीयताम्।।8।।

उद्गीथो निकषो ह्यमोघफलदस्सूच्चारितस्सस्वरः,
आगो हन्ति मलं शरीरजनितं प्रज्ञामनोजं जवात्।
वायोर्मण्डलजं समस्तमनिशं रात्रिदिवाजञ्च यत्,
आर्षश्चोमिति तद्वदन्ति यमिनो राष्ट्राय दत्तन्न किम्।।9।।

गायत्री खलु छन्दसामिति सुधास्यन्दीति घोषस्सदा
कर्णाभ्यामयमौषधामृतरसश्चित्तं समानन्दयन्।
गीतायास्सुविचारसारसरिता स्वाम्यम्बुमाधुर्यदा,
लोकेषु ह्यवगाहयत्यथ मया संसेव्यतां वा त्वया।।10।।

सिन्धुस्सारवती नदीति ऋषिभिस्सारस्वती साधना
यत्राभून्नु शतद्रुव्यासरसिका शक्नीवितस्तादयः।
तेषामन्नवती शकानुमितिकाः स्थित्वोदिता साधवी
भव्या जीवनलेखिकाः श्रुतिदृशामेता विशां कारवी।।11।।

माता यत्र विधानमाशु निखिलं सद्मप्रधाने पदे
स्थित्वाथाऽकृत चोत्सवेषु सततं नार्योऽपि भागम्भराः।
सम्मानं स्वलभन्त ता रतिदृशो मुग्धाः प्रगल्भादयः
सज्जन्ति स्म विभोपमाः शशिरुचो जायेव पत्ये यथा।। 2।।

सैषा व्याहृतिराश वेदवटुभिः सूच्चार्यते पूर्वतः,
मन्त्रात्पाठविधौ सदा फलभुजो मन्त्रो विना निष्फलः।
याऽस्माकं प्रतिभावतां भरतभूस्तामिस्त्रहाह्वायता-
मुक्तं त्वं शृणु मे मतं मिततरं दत्तन्न राष्ट्राय किम्।।13।।

स्वर्गो वा नरकन्ततोऽपि महती लोकाटवी नैकधा
ब्रह्माण्डं विततं विशालधरणी गोलोकधाम्नी गतिः।
सूर्यश्चन्द्रबुधौ बृहस्पतिकुजौ शुक्रश्शनिस्तारकं,
सृष्टिर्वृष्टिरियं नु चेष्टि निखिलं दत्तन्न राष्ट्राय किम्।।14।।

390, रजनीविहार, हीरापुरा, अजमेर रोड़, जयपुर (राज.)

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

षड्विंशः प्रसङ्गः

# विविधप्रतिभानां प्रभुत्वम्

❑ वेणीमाधव गो. धर्माधिकारी

हिन्दुत्वस्य स्वाभिमानं तेषु पूर्णं तथा पूरितमासीत्। तत्तेषां वेशभूषायां, दैनिककृत्येषु, वाण्यां सर्वत्र समान रूपेण प्रकटीभवतिस्म। प्राचीनतायाः गौरवं तेषां भ्रुकुटौ सदैव विलसतिस्म। अत एव यदा कदा जनेभ्यो भ्रमोऽपि भवतिस्म यद् बाबामहोदयाः प्राचीनतापरिमण्डले आबद्धाः सन्ति परमेताद्दशानां भ्रमाणां दूरीकरणमपि ते त्वरितमेव कुर्वन्तिस्म। तत्र प्रमादं नैव कुर्वन्तिस्म। तेषां द्दष्टौ प्राचीनता गौरवस्याधारः यावत्तीव्र आसीत्तावदेवा-ग्रहोऽप्यासीत्। तस्मिन्न कोऽपि समन्वयो भवितुं शक्नो-तिस्म। यद्यावश्यकता स्यात् तदा ते प्राचीनतागौरव-समर्थने अन्तिमसीमापर्य्यन्तं प्रतिपादनं कुर्वन्तिस्म। आधुनिकस्य सन्तुलितस्य हिन्दुत्वस्यापि विचित्रं दर्शनं तेषु भवतिस्म।

वार्ता 1963 ई. वर्षस्यास्ति। आप्टेमहोदयाः प्रवास-योजनया आसामप्रान्ते समागता आसन्। आसामप्रदेशस्य कतिपयानां स्वीयानां वनवासिबन्धूनां प्रमुखनेतृणां सम्मेलनमायोजितमासीत्। ते जनाः खासीजयन्तिया-जातीनामासन्। दश-पंचदश वा उपस्थिता आसन्। अत्रेदमवबोद्धव्यं यत् पाश्चात्यानां कूटनीत्या, अस्माकं हिन्दुसमाजस्यौदासीन्येन चैतासु जातिषु पाश्चात्य-सभ्यतायाः प्रभावोऽधिकमात्रायामासीत्। एतावद् यद् हिन्दुत्वेऽपि भारतीयभाषाभ्यः पार्थक्यमजायत। आंग्लभाषैव प्रतिष्ठास्ति। एतावद् यदांग्लभाषायां वार्तालापस्तेभ्यः स्वाभाविकः प्रतीयतेस्म। ते चेदमा-धुनिकतायाः प्रमुखं रूपं मन्वानाः लक्ष्यन्ते।

यदा बाबामहोदयाश्चर्चां कर्त्तु प्रारभन्त तदा ते भारतीयराष्ट्रभाषायां हिन्द्यामेव चर्चां प्रारभन्त। तेषामुष्णीषं मस्तके तिलकं, वृद्धावस्थां, तेषामुपवेशनविधिं, उपस्थितजनाभिवादनविधिं चावलोक्य जनेभ्यो याद्दशो भ्रमः स्यात् स संजात एव। बाबामहोदयाः संघस्योद्देश्यं कार्यविवरणं च तेषां संमुखे प्रकटीकुर्वन्त आसन्। ते सरलहिन्द्यामेव वदन्तिस्म। ते जनाश्चोपेक्षाद्दष्ट्यैव तेषां शब्दान् शृण्वन्तिस्म अनया भाषया विधिना ते परिचिता नेतीव प्रकटयन्तिस्म। निश्चितमेव तैर्निर्णीतं स्यात् बाबामहोदयाः आंग्लभाषां जानन्त्येव नेति। अतएव ते हिन्द्यारमेव वदन्ति। अन्ते च तेष्वेकश्चैतस्य स्वनिर्णयस्य पुष्टिमिच्छन्नवदत्-बाबा-महोदय! यदि भवन्तः आंग्ल-भाषायां वदेयुस्तदैवेमे भवतां विचारैरवगता भविष्यन्ति।

तस्येदं कथनं नम्रतापूर्णमेवासीदथाप्यस्मिन्नेकं कौतूहलपूर्णं परीक्षणं निहितमासीत्। मह्यं (असमप्रान्त-प्रचारकाय श्रीकान्तजोशीमहोदयाय) भासतेस्म बाबामहोदयाः स्वस्वभावानुसारं कुपिता भूत्वा किञ्चिद् विपरीतं न वदेयुः परं पाश्चात्यानां कूटनीतिवशादुत्पन्ना-मेतां दुःस्थितिमवगत्य किञ्चित् स्मितपूर्वकं धाराप्रवाह-मांग्लभाषायां प्रवचनमारब्धवन्तः।

अधुना तु मयावलोकितं स्वीयानामेतेषां वनवासि-बन्धूनां मुखमण्डले भावपरिवर्तनं जायमानमासीत्। परस्परापरिचयपर्वताः धूलिराशिरिव प्रक्षाल्यमाना आसन्। तेषां वदनेषु बाबामहोदयानां व्यक्तित्वं प्रति श्रद्धा देदीप्य-मानासीत्। ते न केवलं प्रवचनं शृण्वन्ति स्मापितु हृद्गतमपि कुर्वन्तिस्म। प्रायः एकहोरापर्यन्तं ते संघकार्यं, सम्पूर्णे भारते हिन्दूनामेकात्मतां चाधिकृत्य वदन्तआसन्। अस्मिन्नवसरे स्वीया इमे वनवासिनो यदाकर्षिता अभवन् ते सर्वदैव स्वीया अभवन्।

क्रमशः..

**ब्रह्मपुरी, जयपुरम्**

# राष्ट्रं प्रति कर्त्तव्य-भावना

❑ डॉ. अनिता अग्रवाल

( काङ्कर-कथासाहित्ये )

आचार्य- डॉ. नारायणशास्त्रि-काङ्करमहोदयेन स्वकीयं कथासाहित्यं किमपि विशिष्टम् एकं लक्ष्यं दृष्टौ रक्षित्वा न प्रस्तुतम्, अपितु अनेन महाशयेन समाजे यत् निकटतया दृष्टं परीक्षितं च, तदेव स्वकथासाहित्ये चित्रितं कृतम्।

भाषायाः **दृष्ट्या** अपि एतत् कथासाहित्यं दुर्बोधं नीरसं च नैव प्रतीयते। राष्ट्रं प्रति कर्त्तव्यं लक्ष्यीकृत्य काश्चन कथाः डॉ. काङ्करः प्रस्तुतवान्। यस्य राष्ट्रस्य नागरिकाणां मानसपटले राष्ट्र-भक्ति-भावना सञ्चारिता न भवति, तत्रत्यं सामाजिक-जीवनं गौरवान्वितं नैव अनुभूयते। अस्याः एव राष्ट्रीयतायाः भावनायाः सम्बन्धे यजुर्वेदे (६/२३) लिखितमस्ति- **'वयं राष्ट्रे जागृयाम पुरोहिताः स्याम।'**

यस्य मनसि राष्ट्रं रक्षितुं भावना जागरिता भवति, सः सैनिकः भवति। स्वकीयं सर्वं सुखं विस्मृत्य अपि आत्मीयं सैनिक-कर्त्तव्यं प्रपूरयति। **''रक्षाबन्धनं सैनिकाः च''** कथायाः पात्रम् एकः सैनिकः स्वकीयं कर्त्तव्यम् एवमेव प्रकटयति- **''वयं सैनिकाः स्वपरिवारतः अतिदूरे दुर्गम-स्थानेषु स्थिताः शीतवर्षातपादिकष्टानि सहमानाः, बुभुक्षां पिपासां च अपि मर्षयन्तः रात्रौ अपि चिरजागरणस्य चिन्तां न कुर्वन्तः, मातृभूमि-सुरक्षार्थं सीमा-प्रदेशेषु तिष्ठामः।''** (अभिनव संस्कृत-कथा-पञ्चाशिका, पृ.-७३)।

आचार्य- काङ्करः सुख-शान्ति-स्थापनार्थं युद्धं विशिष्टसाधनं नैव मन्यते। सः **''युद्ध-विभीषिकां न कः अनि अनुभवति। युद्धे जन-धन-श्रम-समय-ज्ञानादीनां च कियती क्षतिः जायते? कश्चित् अपि न चिन्तयति। युद्ध-जनितः अग्निः सुचिरमपि न शाम्यति। युद्धस्य घटासु शिरसि विद्यमानासु सर्वविध-वैभववान् अपि जनः न निश्चिन्तं स्वपिति, खादति, पिबति, परिधत्ते, विहरति च।''** (अभिनव संस्कृत कथा-पञ्चाशिका पृ. ७७)

एकः सत्य-सैनिकः स्व-मातृभूमि-सुरक्षार्थं स्वप्राणानपि जुहोति, शत्रुसेनायाः संहारकास्त्र-सञ्चालनात् पूर्वमेव तस्य मुखे निपत्य तद् विफलयति। **''परमवीरः सैनिकः''** कथायाः नायकः सैनिकः ईदृशः एव स्वदेशभक्तः अस्ति-**''अयं स्वप्राणानपि न गणयित्वा शत्रु-सेनायाः संहारक-शस्त्रस्य सञ्चालनात् पूर्वमेव तस्य मुखे निपत्य तद् विफलं कृतवान् आसीत्।''** (अभि. सं. कथा-पञ्चाशिका, पृ. ७७)

सर्वकारः अपि ईदृशाय महामनसे शूरवीर-सैनिकाय **''परमवीर-चक्र''** द्वारा सम्मानयितुं पृष्ठे नैव तिष्ठति। भवतु नाम इमं सम्मानं मरणोत्तरमेव ददातु- **''समाचारपत्राणां प्रथम-पृष्ठे अयं समाचारः प्रमुख-रूपेण प्रकाशितः। मातृभूमि-रक्षायां स्वप्राणानाम् आहुतिं दत्तवते अस्मै वीर-सैनिकाय मरणोत्तरं 'परमवीर-चक्र' प्रदानस्य सर्वकारीय-घोषणा अपि सविशेषं मुद्रिता आसीत्।''** (अभिनव संस्कृत क.प.,पृ.-७७).

आचार्य- डॉ. काङ्कराय हार्दिक-खेदः तदा भवति,

यदा एकत्र मातृभूमि-सुरक्षार्थं सैनिका: स्वकीय-प्राणानां बलिदानं कुर्वन्त: स्यु: तत्र अन्यत्र आरक्षिण: एव भक्षका: भूत्वा जनताम् उत्पीडयेयु:। ''**राष्ट्र-भविष्य-ज्ञाता ईश्वर: एव**'' कथायाम् ईदृश: एव भाव: निहित: अस्ति- ''**श्याम: मातापितृभ्यां सह नगरम् आगत्य गृहनिर्माणे विगत-दश-वर्षेभ्य: श्रमिक: आसीत्। मध्ये-मध्ये स: यदा कदा ग्राममपि प्रत्यागच्छति स्म। एकदा अकाले आपतिते आजीविकाया: अभावेन तस्य मातापितरौ दिवङ्गतौ आस्ताम्। सर्वथा असहाय: एकाकी श्याम: अपि जीवनत: निराश: सञ्जात: किन्तु तस्य मातापित्रो: परिचितेन तस्मै स्वकीयां कन्यां दत्त्वा कश्चन आशाया: सञ्चार: कृत:। स: तया सह नगरम् आयात:। इतस्तत: भ्रमता यत्र यत्र तेन कार्यं कृतमासीत्, तत्र तत्र उच्चा: उच्चा: अट्टालिका: पत्नीं दर्शयन् कम् अपि गर्वं करोति स्म। अस्मिन् एव मध्ये, तत्रत्या: प्रहरिण: तं चौरं मत्वा निगृह्य आरक्षिणां हस्ते समर्पितवन्त:। एतत् प्रतिकर्तुं श्याम: बहु-बहु अचेष्टत। किन्तु तस्य किम् अपि न श्रुतम्। रात्रौ एकाकी स: अपराधि-प्रकोष्ठे निपातित:। अन्येद्यु: तेन श्रुतं यत् तस्य पत्नी कुत्रचित् पलायिता। सा पलायिता, अपहृता, बलात्कृता, मारिता वा? इदं तु परमेश्वर: एव जानाति-**''

**''रक्षका: भक्षका: यत्र यत्र स्त्रीषु बलात्कृति:।**
**भविष्यं तस्य राष्ट्रस्य, वेत्ति केवलमीश्वर:।।''**

संस्कृताध्यापिका
रा.उ.प्रा.सं.वि. मानसरोवर:, जयपुरम्

---

**प्रेरकप्रसङ्गशतकम्** **पंचाशत्तम: प्रसङ्ग:**

# सा परमपवित्रास्ति

❑ **श्रीमती आराधना धर्माधिकारी**

वैशाल्यां धर्मप्रचारार्थं गच्छता महात्मना गौतमबुद्धेनावलोकितं यत्केचन सैनिका: एकस्या: बालिकाया: पृष्ठतो धावन्त आसन्। उच्छ्वसन्ती सा बालिका एकस्य कूपस्य समीपे स्थिताभूत्। बुद्धस्तां कूपाज्जलं निस्सार्य पाययितुमवदत्। तदैव सैनिका अपि तत्र सम्प्राप्ता:। बुद्धस्तान् संकेतेनावरोधितवान्। सा कन्या किंचित्संकुचन्ती अवदत् महाराज! अहमस्पृश्या कन्या मया कूपादुद्धृतं जलं दूषितं भविष्यति। बुद्ध: पुनरवदत्- पुत्रि! तीव्रा तृषास्ति पूर्वं जलं पायय। तदैव तत्र वैशालीनरेशोऽपि समागत:। तेन सुवर्णपात्रे पाटलिकेत-क्योरर्कमिश्रितं सुगन्धिजलं बुद्धाया प्रस्तुतम्, परं बुद्धेन तन्न पीतम्। पुनश्च तामवदत् त्वं पायय पुत्रि! अधुना साहसं कृत्वा कूपाज्जलमुद्धृत्य बुद्धमपाययत्। जलं पीत्वा बुद्धस्तां भयकारणमपृच्छत्। तदा सा अवदत् राजा मम गीतं श्रुत्वा मम कण्ठस्य रसास्वादं गृहीत्वा प्रसन्नो मह्यं स्वकण्ठात्स्वर्णमालिकामिमां प्रदत्तवान्। पश्चाच्च केनचिदवबोधितमस्पृश्या कन्येति। ततश्च मां कारागरे निगडिंतुं सैनिका अधावन्, अहं च कथमपि धावन्ती अत्रागता। स राजा वैशालीनरेश एवासीत् संयोगेन च तत्रैवासीत्। बुद्धो राजानमवदत् शृणु राजन् नेयं कन्या अस्पृश्या त्वमेवास्पृश्य:। यस्या: कण्ठान्निस्सृतं गीतं त्वया श्रुतं रसास्वादो गृहीत: पुरस्कारश्च प्रदत्त: सा कथमस्पृश्या भवितुमर्हति। लज्जितत्वातिरिक्तं नृपस्य नासीदुत्तरम्।

**गुणा: पूजास्थानं गुणिषु न च लिंगं न च वय:**
**पंचाशतीयं प्रथमाऽवचिता प्रेरकाणां प्रसंगानाम्।।**
**श्रीमत्याराधनया तुष्येद् यया सद्गुरु: सोऽयम्।।**

**ब्रह्मपुरी, जयपुरम्**

# ज्योतिषशास्त्रस्य प्रारम्भिकपरिचयः

❑ पं. मनीष उपाध्यायः

ज्योतिषशास्त्रमिदमेकं विज्ञानमस्ति। शास्त्रमिदं किमपि चमत्कारपूर्णं विषयवस्तु नास्ति। इदमेकं विशुद्धं ज्ञानं विज्ञानञ्च। ज्योतिषशास्त्रे प्रायशः खगोलविज्ञानं रेखागणितं, सरलत्रिकोणमित्यादिकतिपयगणितीय-विद्यानां सम्पूर्णं ज्ञानमस्ति। अनेन ज्योतिषशास्त्रेण मनुष्यैः स्वजीवनं सरलं सुगमञ्च कर्त्तुं शक्यते। ज्योतिषशास्त्रसम्बन्धिज्ञानाय सर्वप्रथमं पञ्चाङ्गज्ञानस्य आवश्यकता भवति। पञ्चाङ्गज्ञानं विना ज्योतिषविषयस्य ज्ञानं कर्त्तुं न शक्यते। अतः अनेनैव उद्देश्येनात्र सर्वप्रथमं पञ्चाङ्गस्य विषये एवोल्लेखः क्रियते।

**पंचांगशब्दार्थः –**

**तिथिर्वारञ्च नक्षत्रं योगः करणमेव च।**
**यत्रैतत् पञ्चकं स्पष्टं पञ्चाङ्गं तदुदीरितम्।।**

प्रतिपदादि तिथि, रव्यादिवार, अश्विन्यादि नक्षत्र, विष्कुम्भादि योग, बवादि करण इन पांचों के स्पष्ट मान की गणना जिसमें हो, उसे पंचांग कहते हैं।

**तिथिनामानि –**

**प्रतिपच्च द्वितीया च तृतीया तदनन्तरम्।**
**चतुर्थी पञ्चमी षष्ठी सप्तमी चाष्टमी ततः।।**
**नवमी दशमी चैकादशी च द्वादशी ततः।**
**त्रयोदशी ततो ज्ञेया ततः प्रोक्ता चतुर्दशी।।**
**पौर्णिमा शुक्लपक्षे सा कृष्णपक्षे त्वमा स्मृता।।**

प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी तथा पूर्णिमा ये १५ तिथियाँ कही गई हैं। पन्द्रहवीं तिथि शुक्लपक्ष में पूर्णिमा तथा कृष्णपक्ष में अमावस्या संज्ञक होती है।

**वारनामानि –**

**रविः सोमश्च भौमश्च बुधौ जीवस्तथैव च।**
**शुक्रो मन्दः क्रमेणैते वासराः सप्त-कीर्तिताः।।**

रविवार, सोमवार, भौमवार (मंगलवार), बुधवार, गुरुवार, शुक्रवार तथा शनिवार सात वार व्यवहार में कहे गए हैं।

इन वारों को सूर्यादि क्रम ग्रह कक्षा के आधार पर रखा गया है। सूर्य सिद्धान्त में ग्रहों की कक्षा और वार क्रम के सम्बन्ध में लिखा गया है।

**''मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः''**

**नक्षत्रनामानि –**

**अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः।**
**आर्द्रा पुनर्वसुः पुष्यस्ततः श्लेषा मघा तथा।।**
**पूर्वाफाल्गुनिका तस्मादुत्तराफाल्गुनी ततः।**
**हस्तश्चित्रा तथा स्वाती विशाखा तदनन्तरम्।।**
**अनुराधा ततो ज्येष्ठा तथा मूलं निगद्यते।**
**पूर्वाषाढोत्तराषाढा अभिजिच्छ्रवणस्ततः।।**
**धनिष्ठा शतताराख्यं पूर्वाभाद्रपदा ततः।**
**उत्तराभाद्रपाच्चैव रेवत्येतानि भानि च।।**

1. अश्विनी, 2. भरणी, 3. कृत्तिका, 4. रोहिणी, 5. मृगशिरा, 6. आर्द्रा, 7. पुनर्वसु, 8. पुष्य, 9. अश्लेषा, 10. मघा, 11. पूर्वाफाल्गुनी, 12. उत्तराफाल्गुनी, 13. हस्त, 14. चित्रा, 15. स्वाती, 16. विशाखा, 17. अनुराधा, 18. ज्येष्ठा, 19. मूल, 20. पूर्वाषाढा, 21. उत्तराषाढा, 22. अभिजित, 23. श्रवण, 24. धनिष्ठा, 25. शतभिषा, 26. पूर्वाभाद्रपदा, 27. उत्तराभाद्रपदा, 28. रेवती।

वस्तुत: 27 नक्षत्रों का ही नाम कहा जाता है। इसका कारण यह है कि उत्तराषाढ का अन्तिम चतुर्थांश और श्रवण का प्रथम पञ्चदशांश मिलकर अभिजित का मान होता है।

इसलिए अलग से अभिजित की गणना नहीं होती है। यह सिद्धान्त ही मान्य है। स्पष्ट रूप से अभिजित का मान चन्द्रमा की राश्यादि ९/६°/४०'/००'' से ९/१०°/५३'/२०'' तक निश्चित किया गया है। अर्थात् उत्तराषाढ नक्षत्र की अन्तिम 15 घटी और श्रवण नक्षत्र की 4 घटी कुल 19 घटी अभिजित नक्षत्र का मान है।

**योगनामानि –**

**विष्कंभः प्रीतिरायुष्मान् सौभाग्यं शोभनस्तथा।**
**अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च।।**
**गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा।**
**वज्रसिद्धी व्यतीपातो वरीयान् परिधः शिवः।।**
**सिद्धसाध्यौ शुभः शुक्लो ब्रह्मैन्द्रो वैधृतिस्तथा।**
**सप्तविंशतियोगाः स्युः स्वनामसदृशं फलम्।**

1. विष्कंभ, 2. प्रीति, 3. आयुष्मान्, 4. सौभाग्य, 5. शोभन, 6. अतिगण्ड, 7. सुकर्मा, 8. धृति, 9. शूल, 10. गण्ड, 11. वृद्धि, 12. ध्रुव, 13. व्याघात, 14. हर्षण, 15. वज्र, 16. सिद्धि, 17. व्यतीपात, 18. वरीयान्, 19. परिघ, 20. शिव, 21. सिद्ध, 22. साध्य, 23. शुभ, 24. शुक्ल, 25. ब्रह्म, 26. ऐन्द्र, 27. वैधृति, ये 27 (27) योग है। ये अपने नाम के समान ही फल देते हैं। अर्थात् विष्कुंभ, वज्र, गण्ड, अतिगण्ड, व्याघात, शूल, वैधृति, व्यतीपात, परिध ये 9 योग अशुभ होते है और शेष योग शुभ होते हैं।

**करणनामानि –**

**बवं च बालवं चैव कौलवं तैतिलं गरम्।**
**वणिजं विष्टिमित्याहुः करणानि महर्षयः।।**
**अन्ते कृष्णचतुर्दश्याः शकुनिर्दर्शभागयोः।**
**भवेच्चतुष्पदं नागं किंस्तुघ्नं प्रतिपद्दते।।**

बव, बालव, कौलव, तैतिल, गर, वणिज, विष्टि (भद्रा) ये सात चर करण होते हैं।

कृष्णपक्ष की चतुर्दशी के उत्तरार्ध में शकुनि, अमावस्या के पूर्वार्ध में चतुष्पद, उत्तरार्ध में नाग और शुक्लपक्ष की प्रतिपदा के पूर्वार्ध में किंस्तुघ्न नामक करण होते हैं। यह चारों करण स्थिर करण हैं। ये सर्वदा स्थिर होते हैं।

**विशेष** – प्रत्येक तिथि में दो-दो करण होते हैं। ''तिथ्यर्धं करणम्'' अर्थात् तिथि के आधे को करण कहते हैं। जो बव आदि नाम से 11 (एकादश) हैं।

उनमें से क्रम से 7 (सप्त) चर तथा 4 स्थिर करण हैं। विष्टि करण को ही भद्रा कहते हैं। जो प्राय: सब शुभ कार्यो में त्याज्य है।

मुरलीपुरा, जयपुरम्।

# परिभाषायणां कार्यं लक्ष्यञ्च

❑ डॉ. महेन्द्र शर्मा

''परिभाषा'' शब्द: ''परितो भाष्यते अनया'' इति व्युत्पत्त्या निष्पन्न:। परिभाषा तावद् व्याकरणशास्त्रीय-नियमान् अनवद्यान् करोति। अत एवोक्तम्-

''**अनियते[1] नियमकारिणी परिभाषा**''।

महाभाष्यस्योक्तपाठं व्याख्यायता श्रीकैयटेन उक्तं यत्-

''**कश्चिदिति[2] परिभाषारूप इत्यर्थ:**।।''

परिभाषा खलु संज्ञाऽतिदेशादिरूपेणाऽप्रसिद्धा सती विध्यादिशास्त्रतात्पर्यस्पष्टीकरणपूर्वकं विविधशास्त्र-प्रवृत्तिं शब्दसाधुत्वदिशा योजयति असाधुत्वं च निवारयति। अत:''परिभाषा''इति पदं योगरूढम्।

**परिभाषाणां कार्यम्** -

व्याकरणशास्त्रे दृश्यमाणाऽव्यवस्थानिवारणमेव परिभाषाणां मुख्यकार्यम्। अनियमितताया अव्यवस्थाया वा भेद्दृष्ट्या परिभाषाणामपि विविधानि कार्याणि भवन्ति। अनेका: परिभाषा: व्याकरणशास्त्रे आवश्यक-पदोपस्थितमुखेन सूत्रार्थं व्यवस्थापयन्ति। यथा ''**तस्मिन्निति[3] निर्दिष्टे पूर्वस्य**'' **तस्मादित्युत्तरस्य[4]** प्रभृतीनि परिभाषासूत्राणि तथा च ''प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्'' यस्मिन् विधिस्त-दादावल् ग्रहणे इत्यादि।

सुधी+उपास्य: इत्यत्र शङ्का भवति यदत्र ''**इको[5] यणचि**'' इति सूत्रेण कस्मिन् अचि परत: कस्य इक: यण् स्यात् ? कथं न सकारोत्तरवर्तिन: उकारस्य यण् भवति, धकारोत्तरवर्तिनि ईकारेऽचि परत: ? अस्यां स्थितौ''**तस्मिन्निति[6] निर्दिष्टे पूर्वस्य**''इति परिभाषासूत्रं व्यवस्थापयति।

तेन अव्यवहितपूर्वस्य इक:, अत्र 'उपास्य' इत्यस्य उकारेऽचि परत: तदव्यवहितपूर्वस्य 'सुधी' इत्यस्य धकारोत्तरवर्तिन: ईकारस्य 'इक:' 'यण्' भवति। सकारोत्तरवर्तिन उकारस्य न यण् मध्ये धकारस्य व्यवधानात्।

''प्रत्ययग्रहणे यस्मात् स विहित:'' इति परिभाषा ''**रदाभ्यां निष्ठातो[7] न पूर्वस्य च द:**'' इति सूत्रस्याऽर्थं व्यवस्थापयति। ''तीर्णा'' इत्यत्र तकारस्य नकारो विधीयते, किन्तु 'दृषत्तीर्णा' इत्यत्र धातोस्तकारस्य नकारादेशो न भवति। एवंविधा: परिभाषा: शास्त्रत्वसम्पादिन्य: परिभाषा: ''पदविशेषोपस्थापक'' पदेनाऽपि व्यवहर्तुं युज्यन्ते।

आतिदेशिकपरिभाषारूपेण ''**स्थानिवदादेशो-ऽनल्विधौ**'', **प्रत्ययलोपे[9]** प्रत्ययलक्षणं प्रभृतय: परिभाषा विधिक्षेत्रं व्यापकं कुर्वन्ति, ''व्यपदेशिवद्-भावोऽप्रातिपदिकेन'' प्रभृतयोऽपवादभूता विधिक्षेत्रं सङ्कोचयन्ति।

**परिभाषाणां लक्ष्यम्** -

विधिसंज्ञादिसूत्राणाम्प्रवृत्तौ अव्याप्ति - अतिव्याप्ति - असम्भव - दोषनिवारणं परिभाषाणां प्रमुखं लक्ष्यमस्ति। ''**जराया[10] जरसन्यतरस्याम्**'' इति सूत्रेण 'निर्जरसौ' इति प्रयोगस्य सिद्धौ काठिन्यमागतम्, असम्भव-दोषत्वात्। तत्र 'येन' ''विधिस्तदन्तस्य'' इति परिभाषा, ''पदाङ्गाधिकारे''तस्य च - तदन्तस्य, निर्दिश्यमानस्या-ऽऽदेशा भवन्ति, ''एकदेशविकृतमनन्यवत्'' इत्येता: परिभाषा अव्याप्तिदोषं दूरीकृतवत्य:।

परिभाषाया: स्वीकरणे दोषा अपि आपतन्ति। दोषस्थितौ परिभाषाया - अस्वीकरणात् परिभाषणाम-नित्यत्वं स्वीकुर्वन्ति वैयाकरणा:।

व्याडिपुरुषोत्तमदेवसीरदेवप्रभृतय आचार्या: स्वीकुर्वन्ति पद् ज्ञापकसिद्धा परिभाषा सर्वत्र न स्वीक्रियते। तथा हि श्री पुरुषोत्तमदेवेन ''ज्ञापकसिद्धं न

सर्वत्र'' इति वचनं व्याचक्षाणेनोक्तं- ''ज्ञापकसिद्धं न सर्वत्र इदमप्युचितमेव। ज्ञापकं हि नाम न वाचकं, किन्तर्हि इङ्गितेन सूचकं क्वचिदेव इष्टसिद्धावाश्रीयेत न सर्वत्रेति युज्यते ज्ञापकसिद्धं न सार्वत्रिकम् इति। ज्ञापकसाधितमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोज्यं, किन्तु विशिष्टप्रयोगादर्शनात् क्वचिदेव।''

अर्थात् ज्ञापकसिद्धपरिभाषायाः सार्वत्रिकाभावो युक्तिसंगत एव। ज्ञापकसाधितमात्मनेपदं सर्वत्र न प्रयोज्यं, विशिष्टप्रयोगदर्शनात् क्वचिदेव विधेयम्। 'अगत्या नु परिभाषाऽऽश्रीयते' इति वचनं व्याचक्षाणेन श्रीपुरुषोत्तमदेवेनोक्तम्- ''अगत्या नु परिभाषाऽऽ-श्रीयते। इदमपि यौक्तमेवोच्यते। परिभाषा हि न पाणिनीयवचनानि। किन्तर्हि नानाऽऽचार्याणां तत्र पाणिनीये शब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेनाऽसिद्धिः तत्रैवैता गत्यन्तरमपश्यद्भिः आश्रीयन्ते।न तु यत्रैतासां समाश्रयणे दोष एव प्रत्युपद्यते तत्रैताः समाश्रीयन्ते। एतेन परिभाषासञ्ज्ञनेन नानिष्ट-मित्युक्तं भवति....।।'' श्रीनीलकण्ठदीक्षितस्य मतमस्ति यद् ''ज्ञापकसिद्धं न सर्वत्र'' इति परिभाषायाः मूलं तत्त्वं परिभाषाणामनित्यत्वसूचनम्।

एवं सिद्ध्यति यत् परितो व्यावृता भाषैव परिभाषा तथा च अनियमे नियमकारिणी परिभाषा। यत्र साधुशब्दानामनुशासने साहाय्यमपेक्ष्यते वा तत्रैव परिभाषाणामाश्रयणं विधीयते। यत्र परिभाषाया आश्रयणे दोषस्तत्र परिभाषाया आश्रयणं न विधीयते। अतोऽनित्यत्ववदपि परिभाषा व्याकरणशास्त्रे शब्दाननुशंसयितुमतीवोपकारिण्यः सहायिकाश्च भवन्ति, यथास्थानं यथायोग्यं वा व्यवहर्तव्याः।

**संदर्भ पादटिप्पणी**

1. इकोगुणवृद्धी - परिभाषेयं स्थानिनियमार्था। अतिप्रसङ्गे नियमो विधीयते। काशिका 1.1.3।। 2. कैयटः प्रदीपः 1.1 सू. 47!! 3. पाणिनिः - अष्टाध्यायी 1.1.66।। 4. तत्रैव 1.1.67।। 5. तत्रैव 6.1.77 6. तत्रैव 7. तत्रैव 8.2.42. 8. 1.1.46 9. तत्रैव 1.1.62 10. तत्रैव 7.2.10

**शोधछात्रः**


## निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।

नाम................................ ...........पुत्र/पुत्री श्री............................भवन संख्या..........

गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस....................................

तहसील...............................जिला.......................राज्य....................................

देश..................पिन.......................................दूरभाष.......................................

मोबाईल नं............................ईमेल.....................................................................

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014

ई–मेल – sanskritbharti09@gmail.com

# दृश्यश्रव्यशिक्षयोः संकल्पना

❑ सचिनकुमारः

मानवमस्तिष्कस्य वैचारिकतीक्ष्णतया ज्ञान-विज्ञानयोः क्षेत्रे नित्यं प्रति तीव्रगामी विकासो जायमानोऽस्ति। विविधवैज्ञानिकैः विषयविशेषज्ञैश्च नित्यमहः नूतनप्रत्यया आविष्क्रियन्ते। येषामुत्पत्तेरपेक्षया अनुप्रयोगः प्रसारश्च मन्दगत्या जायते। कारणेनानेन विदितस्य वेदितव्यस्य च ज्ञानस्य प्रत्ययस्य वा मध्येऽन्तरालः वृद्धिमवाप्नोति सहैव च वैज्ञानिकज्ञान-विस्फोटेन पूर्वापेक्षया अत्यधिकप्रत्ययानां विकासेन तज्ज्ञानस्य आत्मीकरणेऽपि जाटिल्यमागच्छति। अत एव शिक्षणाधिगमप्रक्रियायां शिक्षकस्य कार्यं सर्वत्र कठिनं जटिलं व्यावसायिकं (Professional) चाभवत्। आधुनिकपाठ्यचर्यायां छात्रशिक्षकयोः चिन्तनमनना-दीनामाधिक्यं वर्तते। शिक्षणप्रक्रियायाम् अनुदेशसामग्री-चयनक्षेत्रमपि अधिकं विस्तृतं सञ्जातम्। अत एतादृशपरिस्थितौ शिक्षकः आधुनिकाधिगमपद्धतेः अंशत्वेन नूतनसाधनानां प्रयोगविधिमधिगच्छेत्। छात्रशिक्षकौ द्वावपि अधिकम् अवगच्छेताम्, अधिकं स्मरेताम् अधिकप्रभाविरीत्या चानुप्रयुञ्जेताम्।

मनोवैज्ञानिकानुसन्धानैः ज्ञायते यत् कोऽपि बालकः यावत् पश्यति शृणोति च, तावदेवाधिकं द्रष्टुं श्रोतुञ्च तेन प्रयत्यते। सम्प्रति शैक्षिकक्षेत्रे नूतनविभिन्नतायुक्तानाम् अनुदेशसामग्रीणाम् अपेक्षा भवति। अत एव शिक्षणाधिगमप्रक्रियायां विविधसहायकसामग्रीणां प्रयोगः समारब्धः। यश्च प्रायः सर्वेषां विषयाणा-मध्ययनाध्यापने समाश्रितः। यतः शिक्षणसहायक-सामग्रीणां प्रयोगेण शिक्षणम् आकर्षकं सरलं प्रभावपूर्णञ्चाभवत् अधिगमश्च स्थायी जातः। शिक्षणे दृष्यश्रव्योपकरणानां प्रयोगेन पर्याप्तप्रभावः जायते, इत्यनुसन्धानैः ज्ञायते। यथा 'जेम्स क्यू. नोल्टन' महोदयोऽभिव्यनक्ति- ''शिक्षायाः स्थूलक्षेत्रं तस्य भागस्य अभिधानकर्ता (Designated) भवति, यस्य सम्बन्धः सचित्रैः तथा अन्यमूर्तिकैः (Iconic) सादृशिकैः (Enalogic) सन्देशैः वर्तते। यतः एते अधिगमप्रक्रियां प्रभावयन्ति''। 1 तस्यानुसारं बालकः द्विविधसन्देशान् अधिगच्छति-

✤ मौखिकसन्देशाः - ये प्रयुज्यमाणविषयवस्त्वा-दीनां सदृशाः न भवन्ति।

✤ सचित्रसन्देशः- ये च प्रत्यक्षेण प्रयुज्यमाण-विषयवस्त्वादीनां स्मरणं कारयन्ति।

अधिगमप्रक्रियायाम् अनुभवस्य विशिष्टं स्थानम्। अतएवानुभवः स्वकीयविशिष्टभूमिकया एक उत्तमः शिक्षकः मन्यते। बालकेन प्रज्वल्यमानवस्तुनः स्पर्शः तं ज्वलनशीलवस्तूनाम् असुरक्षितस्पर्शात् पूर्वं विचारयितुम् अनुभवं ददाति। अनेन विविधानुभवैः बालकस्य व्यवहारे समागतानां परिवर्तनानां कारणेन तस्य जीवनं व्यवस्थितं सफलञ्च भवति। अथात्र यावत् महत्त्वं प्रत्यक्षानुभवानां (Direct Experience) भवति, तावदेव अप्रत्यक्षानुभवाः (Indirect Experience) अपि प्रभावं जनयन्ति। अधिगमप्राप्तये सर्वदा प्रत्यक्षानुभवाः

नावश्यका:, अपरेषाम् अनुभवान् श्रुत्वा अथवा दृष्ट्वाऽपि अधिगच्छति छात्र:। दृश्यश्रव्यसाधनै: प्राप्यमाणानुभवा: 'एडगर डेल'2 महोदयेन त्रिधा: विभक्ता:-

- ✤ अभिनयी - Anathine,
- ✤ मूर्तिक: - Iconic,
- ✤ प्रतीकीय: - Symbolic चेति।

शिक्षणप्रक्रियायां शिक्षार्थी न्यूनातिन्यूनसमये स्वल्पपरिश्रमेण अधिकाधिकमधिगन्तुमिच्छति, तथा शिक्षकोऽपि सर्वदा तादृशोपायानां, रीतीनां, उपकरणानां सामग्रीणाञ्च प्रयोगं शिक्षणे कर्तुमिच्छति, येन स: शिक्षार्थिभ्य: न्यूनातिन्यूनसमये स्वल्पपरिश्रमेण अभीष्ट-विषयस्य अधिकाधिकं प्रभावपूर्णमधिगमं कारयेत्।इदम् अधिगममस्य मनोविज्ञानेन ज्ञायते। यस्यानुसारम् अधिगमप्रदाता अधिगन्तृभ्य एतादृशानुभवान् प्रदीयेत् ये अधिकाधिकं प्रत्यक्षानुभवसदृशा: स्यु:। उदहरणार्थं-छात्र: सिंहस्य विषये पाठनीय: चेत् सिंहस्य वर्ण-रूप-स्वभाव-प्रवृत्ति-अङ्ग-प्रत्यङ्गानां मौखिकवर्णनमात्रेण वाञ्छितसाफल्यं न प्राप्यते। अनेन बालका: सम्यगधिगन्तुं नार्हन्ति, नैव प्राप्तज्ञानस्य स्थायिरुपेण स्मरणं करिष्यन्ति। इत्थं शिक्षक: शाब्दिकरूपेण बोधयितुम् इच्छन्नपि काठिन्यमनुभवेत्। सिंहस्य विषये समुचितज्ञानार्जनाय प्रत्यक्षानुभव: सर्वोत्तम: भविष्यति। एतदर्थं शिक्षार्थी सिंहस्य दिनचर्यामवगन्तुम् अध्यापकेन उत अभिभावकेन सह जन्तुशालायाम् अभयारण्यं वा गत्वा स्वयमनुभवमर्जयेत्। एतदतिरिच्य तद्विषकज्ञान-प्राप्तये न किमपि अन्यदेतादृशसाधनम्।

परञ्च उपर्युक्तरीत्या प्रत्यक्षानुभवेन ज्ञानप्राप्ति: सर्वदा न सम्भवति। अपि चेदं श्रमशक्तिधनदृष्टिभिरपि अनुपयोगी अदूरदर्शितापूर्णञ्च कार्यम्। एतादृश्यां परिस्थितौ प्रत्यक्षानुभवानां विकल्पानामन्वेषणं क्रियते। छात्राय सिंहस्य तस्य प्रवृत्तेश्च विषये अपेक्षितमनुभवं प्रदातुं चित्रं, रेखाचित्रं, भित्तिचित्रं, चलच्चित्रमित्यादीनि दर्शयितुं शक्यन्ते। दूरदर्शनं, चलच्चित्रं, सङ्गणकादीनि उन्नतसाधनानि अधिकोत्कृष्टरीत्या अधिगन्तुमर्हन्ति। एवं सर्वेषामपि श्रव्यदृश्योपकरणानामुपयोगस्य आवश्यक-योग्यता श्रव्यदृश्यशिक्षान्तर्गतं समायाति। यया बालकं कस्यचिद् वस्तुन:, विचारस्य, प्रक्रियाया: वा ज्ञान-प्रदानाय प्रत्यक्षानुभवापेक्षया अप्रत्यक्षानुभवसम्बन्धिता: तादृशा: विकल्पा: प्रस्तोतव्या: यै: बालक: स्वकीयदृश्यश्रव्येन्द्रिये उपयुज्य श्रवणस्य दर्शनस्य च समुचितावसरमवाप्नुयात्3।

इत्थं श्रव्यदृश्यशिक्षा नाम सा शिक्षा यया कमपि छात्रं दृश्यश्रव्यसाधनानां प्रयोगे तावत् योग्यं प्रवीणं च कुर्यात्, येन स वाञ्छिताप्रत्यक्षानुभवै: सम्बन्धितशिक्षणाधिगम-कार्ये पूर्णसाफल्यमर्जयितुं सु-अवसरं प्राप्नुयादिति। मिश्रा-यादवमहोदयौ4 दृश्यश्रव्यशिक्षाम् एकमनुदेशन-रूपेण स्वीकुरुत:। शिक्षणाधिगमक्षेत्रे दृश्यश्रव्यो-पकरणानां प्रयोग: यावदावश्यकं तावदेव एतेषामुपयोगे यथेष्टकुशलप्रदातृश्रव्यदृश्यशिक्षाया: उपादेयता भवेत्।

श्रव्यदृश्यशिक्षान्तर्गतम् अधिगमसिद्धान्तेषु शिक्षणस्य सहायकसामग्रीणां यत्र कुत्रापि आवश्यकता अवकाशो वा भवति, तत्र अधिगमसहायकानि शिक्षणोपकरणानि कथं कीदृशं कियच्च साहाय्यं

यच्छन्ति? इत्यत्र निम्नलिखितानां बिन्दूनां माध्यमेन स्पष्टीकर्तुं प्रयास: विधीयते।

**१. अधिगम-अभिप्रेरणस्य संवर्धनम् ( Development of Learning Motivation )**

शैक्षिकमनोविज्ञाने कृतै: शोधकार्यै: स्पष्टं भवति यत् अधिगमस्य अभिप्रेरणा सार्थकशिक्षणस्य अनिवार्य-तत्त्वमेकम्। अपि चात्र दृश्यश्रव्यसामग्र्य: अधिगन्तॄणां अभिप्रेरणाया: संवर्धने महदवदानं यच्छन्ति5। अस्य परिणामेन शिक्षा भावात्मकदृष्ट्या उद्दीप्ता बौद्धिकदृष्ट्या च प्रभावशालिनी जायते। अस्माभि: द्रष्टुं शक्यते यत् यदा किमपि चलच्चित्रं, दूरदर्शनस्य प्रसारणमेकम् अथवा आकाशवाणीकार्यक्रम: प्रसार्यते, तदा अमुं प्रसारण-कार्यक्रमं प्रति दीयमानम् 'अवधानम्' अधोलिखित-कारणै: सम्भवति-

* प्रसारणस्य मूर्तता अभिरुचिश्च।

* ध्वनिशब्दचित्रादीनां प्रसारणेन वर्धमानाविचारस्य

* सातत्यम्।

प्रस्तुतिविशिष्टाधारिता: अधिगमसहायिका सावधानता तथा कलात्मकता।

**२. अधिगमे नवीनता-विविधतोत्पादनम् ( Generate newness and Diversity in Learning )**

छात्राणां ज्ञानसंवर्धने सहायकं विशिष्टं विधानमेत-दस्ति यत् तेभ्य: अभूतपूर्वा: उत्साहवर्धका: प्रसन्नतो-त्पादका: वैविध्यगुणसम्पन्ना: नूतनानुभवा: प्रदातव्या:। अथात्र नावीन्यं वैविध्यञ्च दृश्यश्रवणोप-करणानां प्रमुखं वैशिष्ट्यद्वयम्। शिक्षणस्य सहायकोपकरणानि छात्रेभ्य: नित्यनूतनानुभवं प्रदातुं सर्वथा समर्थानि भवन्ति। स अनुभव: सर्वदा वैविध्यगुणयुक्त: भवति।

**३. विशेषयोग्यतानां सशक्तीकरणम् ( Empowerment of Special Abilities )**

शिक्षणे दृश्यश्रव्यसामग्रीणां क्रमबद्धोपयोग: विविधपृष्ठभूमि-योग्यतायुक्तानां विशेषच्छात्राणाम् आवश्यकतानां पूर्तये साहाय्यं प्रददाति6। एतादृश-च्छात्रेभ्य: सामान्यरूपेण पाठ्यते चेत् ज्ञानार्जने काठिन्यं भवति। तत्रैव यात्रा, प्रदर्शनं, दूरदर्शनं, प्रतिकृत्यादीनां उपयोगेन ते साक्षात् अधिगन्तुम् अर्हा: भवन्ति।

**४. सक्रियसहभागितायै प्रोत्साहनम् ( Feedback to Active Participation )**

दूरदर्शनादिभि: प्रदर्शितं प्रसारणं छात्रेषु अन्तर्ग्रस्तताया: भावनां वर्धयति। प्रदर्शनकाले जायमानानां घटनानाम् अनुकरणं ते स्वयमेव कर्तुं सक्षमा: भवन्ति। एतादृशी अन्तर्ग्रस्तता बालकं स्वकीयाधिगमस्य तात्कालिकोपयोगे समर्थं निर्माति। यत: ते दृष्टस्य श्रुतस्य च (विषयवस्तुत:) प्रदर्शनस्य घटनाया: या वा अनुप्रयोगं सार्थकरीत्या नवीनपरिस्थितिघटनादिषु कुर्वन्ति। अत्र दृश्यश्रव्यसामग्र्य: छात्रान् सक्रियं कर्तुं प्रेरयन्ति।

**५. आवश्यकपुनर्बलनप्रदानम् ( Give Necessary Reinforcement )**

दृश्यश्रव्योपकरणै: प्राप्यमाणं पुनर्बलनम् अधिगमाय सार्थकप्रतिफलप्रदानस्य सुविदितयोग्यता वर्तते। अधिगमे सर्वाधिकोत्तमं प्रतिफलं बालकेन स्वयं प्राप्तं

पुनर्बलनमिति मनोवैज्ञानिकाः स्वीकुर्वन्ति। तत्र सः स्वकीयं निष्पादनं परिष्कर्तुं समर्थः सन् पुनर्बलनमवाप्रोति।

यथा एकेन बालकेन कस्यचित् प्रतिकृतेः विभिन्नाङ्गानां संयोजनेन बहुधा प्राप्तनवीनप्रवीणतायाः भावनायां सार्थकमेव प्रतिफलं प्राप्यते। अपि च सः स्वस्मिन् विकासाधिगमयोः योग्यतायाः चञ्चलानुभूतेः अनुभवं करोति।

**६. अनुभवप्रसारक्षेत्रसंवर्धनम् ( Development of Experience Range )**

नूतनपरिस्थितिषु स्वकीयज्ञानस्य अनुप्रयोगसामर्थ्यमिति संकल्पनाविकासस्य अत्यावश्यकतत्त्वमेकं सामान्यीकरणस्य योग्यता अस्ति। परञ्चैतत् स्पष्ट्यते यावत्पर्यन्तं कोऽपि बालकः नवीनानुभवं व्यापकप्रसारक्षेत्रं (range) यावत् विस्तृतं भवति, तावदेव तस्य सामान्यीकरणयोग्यता अपि विस्तृता भवति 7। वस्तुतः आधुनिकशैक्षिकोपकरणानि ज्ञानेन्द्रियाणां शक्तीनां स्वकाल्पनिकक्षमतानां च विकासेन अतीवलाभं प्रददति।

**विचाराणां क्रमस्य सातत्यस्य च आश्वस्तीकरणम् ( Confirmation of Sequence & Continuity of Ideas )**

अधिगमे सङ्कल्पनानिर्माणे अनेकानुभवाः स्वेच्छया सञ्चयितुं न शक्यन्ते। तदर्थमेकः क्रम एका तर्कसङ्गतशृङ्खला चात्र निहिता स्यात्। सन्दर्भेऽस्मिन् दृश्यश्रव्योपकरणानि विशेषतया उपकुर्वन्ति। प्रक्रियायामस्यां विषयविशेषस्य सातत्यं तथा विषयवस्तुनः विविधपक्षैस्सह परस्परसम्बन्धाः बालकस्य प्रगामिविकासाय विमर्श्यन्ते। दृश्यश्रव्यप्रस्तुतयः प्रायः सङ्घटने तर्कसङ्गततां विषयवस्तूनि स्पष्टताञ्च उत्पादयन्ति।

इत्थम् उपर्युक्तविवेचनेन ज्ञायते दृश्यश्रव्येन्द्रिययोः अस्माकं शिक्षणे सामान्यप्रभावितायां महान् प्रभावः। दृश्यश्रव्यशिक्षा अपरासां शिक्षणपद्धतीनां तुलनायाम् अधिकानुकूलं प्रभावं जनयति। शिक्षणसहायकानि उपकरणानि च साम्प्रतिकशिक्षणप्रक्रियायाम् अधिगमार्जने अत्यन्तं लाभप्रदानि भवन्ति।

शोधच्छात्रः

शिक्षाशास्त्रविभागतः, रा.सं.संस्थानम्

जयपुरपरिसरः, जयपुरम्।

1. जेम्स, क्यू.नोल्टन, ए कॅन्सेप्चुअल स्कीम फ़ोर ऑडियो विसुअल फ़ील्ड, बुलेटिन ऑफ् दि स्कूल ऑफ एजूकेशन, वोल्यूम ४०, पृ ५.
2. डेल, एडगर, ऑडियो विजुअल ऐड्स इन् टीचिंग, अनु. माथुर, पी.एन., वैज्ञानिक तथा तकनीकी शब्दावली आयोग (मा.सं.वि.मं.), हरियाणा साहित्य अकादमी, चन्डीगढ़ १९८७.
3. मिश्रा, एस.के. तथा यादव, बद्री, ऑडियो विसुअल ऐड्स ऐन्ड दि सेकेन्डरी स्कूल टीचिंग, ग्लोबल जर्नल ऑफ ह्यूमन सोशल साइंस, यू.एस.ए., २०१४ पृ. १५
4. तत्रैव, पृ १९,
5. एम्ए् ममून, इफैटिवनैस ऑफ आडियो विजुअल ऐड्स इन लैंग्वेज टीचिंग इन टेरशियरी लेवेल, वी.आर.ए.सी. विश्वविद्यालय, ढाका, २०१४, पृ. ३
6. राष्ट्रिय पाठ्यचर्या की रूपरेखा, २००५ पृ. १३५
7. http://www.slideshare.net/Kshacke3/audiovisuallearning. P. 4/11

# चार्वाकदर्शने गुणभेदपर्यालोचनम्

❑ सतीश रछोया

चार्वाकदर्शने गुणस्य स्वतन्त्रसत्ता न स्वीक्रियत इति तु सिद्ध्यति। केवलं भूतानां तत्त्वरूपेण स्वीकृतत्वात् चार्वाकदर्शने गुणादीनां स्वतन्त्रपदार्थत्वेन स्वीकरणं न जायते। न्यायादिदार्शनिकाः यथा गुणगुणिनोः अत्यन्त-भेदरूपत्वं स्वीकुर्वन्ति तथा एते दार्शनिकाः न स्वीकृत्य गुणगुणिनोरभेदरूपत्वं प्रतिपादयन्ति। तन्मतानुसारं भूततत्वाभिन्नं एव गुणः इति। अत्र केवलं महासमवायात्मक एकीभूतचतुर्भूवात्मका द्वैतभूतो हि तत्त्वरूपेणाख्यायते। यदि न्यायादिवदत्र गुणीभूतेषु तदतिरिक्तस्य गुणस्य स्वीकरणं स्यात्तर्हि अद्वैतभूतमात्रस्य तत्वरूपाख्यापनं कथमपि न संगतं भविष्यति। रक्तं पुष्पमित्यत्र नैयायिकाः रक्तः इति पदस्य वाच्यार्थः रक्तरूपयुक्तः इति लक्ष्यार्थो वा तादात्म्यसम्बन्धेन विशेषणत्वेन, पुष्पं च विशेष्यत्वेन स्वीकुर्वन्ति। भेदतादात्म्ययोः विरोधः स्वतः सिद्धः। अतः रक्तरूपयुक्तः पुष्पं चानयोः तादात्म्यस्वीकाराद् भेदः कथमपि स्वीकर्त्तुं न शक्यते। परन्तु तादात्म्ये विशेष्यविशेषणभावः स्वीक्रियते। अतः गुणगुणिनोरभेदः तादात्म्येन प्रतिपाद्यते। अनयो गुणगुणिनोः तादात्म्यस्वरूपाभेदस्य मान्यतायां विप्रतिपत्तौ समवायात्मकाभेदस्य स्वीकरणे कठिनता नानुभूयत इति चार्वाकविदः वदन्ति।

**गुणलक्षणम्**

चार्वाकदर्शने ये प्राचीनाचार्याः अर्वाचीनाश्चाचार्याः स्मर्यन्ते ते गुणविषये क्रिमपि स्पष्टं नोक्तवन्तः। तथापि भूततत्त्वाभिन्नरूपेण केचन गुणाः स्वीकृताः प्राप्यन्ते। ते गुणाः चतुर्दशसंख्यकाः इत्याचार्य आनन्दझामहोदयः वदति1। ते तथा-

1. रूपम्, 2. रसः, 3. गन्धः, 4. स्पर्शः, 5. संख्या, 6. परिणामः, 7. संयोगः, 8. विभागः, 9. बुद्धिः, 10. सुखम्, 11. दुःखम्, 12. गुरुत्वम्, 13. संस्कारः, 14. शब्दः।

अवशिष्टाः न्यायादिसम्मताः पृथक्त्व-परत्व-अपरत्व-इच्छा-द्वेष यत्न-द्रवत्व-स्नेह-अदृष्टाः गुणाः उपर्युक्तेषू-ल्लिखितेषु गुणेष्वन्तर्भवन्तीत्येषां स्वतन्त्रपरिगणनं नाभवत्। येषां गुणानां चर्चाऽत्र भविष्यति यत् चार्वाकविपश्चितः गुणस्य विषये तथा वदन्ति यथा न्याय-वैशेषिकविपश्चितः स्वकीयगुणव्याख्यानावसरे तत्वस्वरूपं स्पष्टीकुर्वन्ति।2 अत एतन्मतानुसारं गुणस्य द्रव्याश्रयत्वं निर्गुणत्वं निष्क्रियत्वं च लक्षणमिति स्वीकर्तुं शक्यते। आचार्योऽपि तस्यैवानन्दझा-वर्यस्य कथंचिदस्य पाक्षिकखण्डने प्रवृत्तिरपि परिलक्ष्यते।

सर्वदर्शनसंग्रहे माधवाचार्यः सर्वेषामन्येषां सिद्धान्तानां चर्चां करोति। परन्तु गुणस्य चर्चा तेन न विहिता। न केवलं झामहोदयानां एतस्मात् कारणात् सुखं न हेयम्। अतः दुःखभयात् अनुकूलवेदनीयं सुखं व्यक्तुं नोचितं प्रतिभाति। अतः चार्वाकाः वदन्ति यत् मृगाः सन्तीति शालयो नोप्यन्ते। अथवा भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते इति कश्चित् विचारो नोचितः। यदि कश्चिद् भीरुः दृष्टं सुखं त्यजेत् तर्हि सः पशुवत् मूर्खः स्यात्। उक्तं च-

**''त्याज्यं सुखं विषयसङ्गमजन्म पुंसां,**
**दुःखोपसृष्टमिति मूर्खविचारणैषा**
**ब्रीहीञ्जिहासति सितोत्तमतण्डुलाढ्यान्**
**को नाम भोस्तुषकणोपहितान्हितार्थी 1''**

एतन्मते यावत् जीवति तावत् पर्यन्तं सुखपूर्वकमेव जीवितव्यम् अतः वदन्त्येते-

**यावज्जीवेत्सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।**

**शोधछात्र**
राष्ट्रीयसंस्कृतसंस्थान, जयपुर

---

1. चा.द.पृ. ३४६

1. चा.द.पृ. ३४६
2. तत्रैव पृ. ३४६

1. चर्वाकदर्शनम् पृ. २४

1. चा. दर्शन पृ. ३८५
2. तत्रै उद्धृतम्
3. सर्व. पृ. ५
4. चा. दर्शनम् पृ. ६

नारी-स्तम्भः

# नास्ति किञ्चन दुष्करम्

❑ डॉ. राजेश्वरीभट्ट



अप्रतिहतगत्या-शक्त्या-मत्या च 32000 किलोमीटरपरिमितं दीर्घं मार्गमात्मनाद्वितीयेन सह मरुत्तरयानेन 57 दिनेषु पारं कृत्वा भारतीयमूलस्य 'ब्रिटेन' निवासिनी, चिकित्साकर्मणि कुशला डा. भारूलता कांबले विश्वस्मिन् विश्वे कारचालिकासु महिलासु 'प्रथमा' इति प्रथिता जाता। आत्मना प्रवर्तितायां दुर्गमकारयात्रायां अभिमुखागतान् पर्वतमहाद्वीप-मरुस्थलादीनवरोधानवगणयन्ती, नतोन्नतेषु दुर्गममार्गेषु च सततं अग्रे मच्छन्ती 'भारुलता' निखिले विश्वे चमत्कृतिजनयत्। ब्रिटेनदेशाद् भारतदेशपर्यन्तं अनवरतगत्या मरूत्तरवाहनं चालयन्ती भारूलता विश्वेऽभिनवं कीर्तिमानं स्थापितवती। डा. भारूलतया प्रदर्शित-स्यापूर्वकारचालनकौशलस्य प्रशंसा 'गिनीबुक' इति पुस्तके समन्विता भविष्यति इति प्रस्तावो जातः। भारूलतायाः कथनेन ज्ञायते यत् आत्मनो जन्मस्थाने गुजरातप्रदेशे नवसारी ग्रामे सर्वसुविधा सम्पन्नस्य चिकित्सालयस्य स्थापनाय धनसंग्रहेण सहैव राष्ट्रे नारीसशक्तीकरणं प्रति जनजागरणं भवेद् इदमेव भारूलताया दुर्गमयात्रायाः प्रयोजनं वर्तते।

गुजरातप्रदेशे नवसारीग्रामे जाता भारूलता न केवलं कारचालनक्षेत्रेऽनन्या वर्तते अपितु, बहुमुखीप्रतिभासम्पन्नेयं तेजस्विनी, यशस्विनी, मनस्विनी किमधिकं शाणोल्लिखितमणिरिव दीप्तिमती महिला वर्तते। भारूलताया बाल्यावस्था नातिस्मरणीया वर्तते। अल्पवयस्येव सा पितृभुजच्छायया वञ्चिता जाता। ततो भारूलतायाः पितामहेन पौत्र्या अन्तर्निहिता प्रतिभाऽभिज्ञाता। स यथासमयं विद्यालये समायोजितासु प्रतियोगितासु प्रतिभागितायै पौत्रीं प्रेरयामास। पितामहेन प्रेरिता पौत्री पुस्तकीयज्ञानादतिरिक्तं संगीत-नृत्य-नाट्यादिषु विषयेष्वपि विशिष्टं प्रशिक्षणं प्राप्य प्रशिक्षकैः प्रशंसिता जाता। ब्रिटेनदेशे विश्वस्मिन् विश्वे ख्यातिप्राप्तायाः नृत्यकलाकुशलायाः सूर्यकुमार्याः सन्निधौ संगीतनृत्यादीनां प्रशिक्षणं प्राप्य कलाक्षेत्रे भारूलता महतीं कीर्तिम् अर्जितवती। कालान्तरे आत्मनोऽभिनयनैपुण्येन भारूलतया देवधरप्रोडक्शन इति संस्थाया माध्यमेन, अनेकवृत्त-चित्राणि रचितानि। येषु 'ओ मेरा गणेश' - 'सावित्रीबाईफुले' बाबाशिवाजी इत्यादीनि प्रमुखानि सन्ति। आत्मनः कर्मकौशलेन बुद्धि-नैपुण्येन च भारूलता 'आस्ट्रेलिया' देशे आमन्त्रिता जाता। तत्र व्यापारदलस्य सदस्यरूपेण सम्मानिताऽभवत् 2011 तमे वर्षे भारूलता 'टाटाब्रदर्स' द्वारा सम्मानसूत्रकेन, शोभनेन,

**दुर्लभेन, किरीटेनाभिनन्दिता जाता। दानशीला भारूलता यथासमयं जनकल्याणकार्येभ्यः किञ्चित् किञ्चित् समर्प्य कृतार्थमात्मानं करोति। सर्वगुण-सम्पन्ना भारूलता नूनं नारीरत्नं वर्तते।**

## हिन्दी अनुवाद

अप्रतिहत गति-शक्ति एवं यति से 32000 किलोमीटर लम्बे मार्ग को अकली ही 57 दिनों में कार से पूरा करने वाली भारतीयमूल की ब्रिटेन निवासिनी, चिकित्सा कर्म में कुशल, डा. भारूलता विश्व की कारचालक महिलाओं में 'प्रथम' मानी जाती है। अपनी इस दुर्गम यात्रा के मध्य मार्ग से बाधास्वरूप पर्वत, महाद्वीप, एवं मरूस्थलों को पार करती हुई ऊँचे नीचे तथा दुर्गम मार्गों पर चलती हुई भारूलता ने समस्त विश्व को अपने साहस से चमत्कृत किया। 'ब्रिटेनदेश' से भारतवर्ष तक अनवरत गति से कार चलाती हुई भारूलता ने अपने कौशल से नया कीर्तिमान स्थापित किया है। 'भारूलता' के अपूर्व कार चालन कौशल की प्रशंसा 'गिनीजबुक' में की जाएगी ऐसा प्रस्ताव है। भारूलता के वचनों से ज्ञात होता है कि उनकी दुर्गमयात्रा का उद्देश्य अपने जन्मस्थान 'गुजरात' प्रदेश स्थित 'नवसारी' ग्राम में सर्व सुविधा सम्पन्न चिकित्सालय की स्थापना, एवं राष्ट्र में नारीसशक्तीकरण के प्रति जनजागरण की भावना को प्रसारित करना है।

गुजरात प्रदेश के 'नवसारी' ग्राम में उत्पन्न भारूलता केवल कारचालन क्षेत्र में ही अनन्या नहीं है अपितु बहुमुखी प्रतिभा सम्पन्न भारूलता, तेजस्विनी, यशस्विनी, एवं मनस्विनी तथा शाणोल्लिखितमणि की भाँति दीप्तिमती महिला हैं। भारूलता का बचपन बहुत सुखद नहीं रहा, अल्पायु में ही ये अपने पिता के वात्सल्य से वञ्चित हो गईं। इस स्थिति में भारूलता के दादा ने पौत्री की अन्तर्निहित प्रतिभा को पहचाना उन्होंने समय-समय पर विद्यालय में आयोजित प्रतियोगिताओं में प्रतिभागिता के लिए पौत्री को प्रेरित किया। पितामह के द्वारा प्रेरित पौत्री ने पुस्तकीय ज्ञान के अतिरिक्त संगीत-नृत्य-नाट्यादि विषयों में प्रशिक्षण प्राप्त किया एवं अपने कौशल से प्रशिक्षकों से प्रशंसित हुई। ब्रिटेन देश में भारूलता ने विश्वप्रसिद्ध कलाविज्ञ 'सूर्यकुमारी' की सन्निधि में संगीतनृत्यादि कलाओं की शिक्षा प्राप्त की एवं अपने कौशल से कीर्ति अर्जित की। कालान्तर में अपने कलाकौशल से 'देवधर प्रोडक्शन' नामक संस्था के माध्यम से अनेक वृत्त चित्रों की रचना की जिनमें 'ओ मेरा गणेश', 'सावित्री बाई फुले' बाबा शिवाजी इत्यादि प्रसिद्ध हैं। अपने कलाकौशल एवं बुद्धिनैपुण्य से भारूलता 'आस्ट्रेलिया' आमन्त्रित की गईं। तथा वहाँ व्यापार दल की सदस्य के रूप में सम्मानित हुई। 2011 ई में भारूलता 'टाटा ब्रदर्स' द्वारा सम्मान सूचक, सुन्दर एवं दुर्लभ 'मुकुट' के द्वारा अभिनन्दित की गईं। दान करना भारूलता की रुचि है। समय-समय पर जनकल्याण कार्यों के लिए कुछ-कुछ समर्पित कर भारूलता अपने को कृतार्थ करती है। सर्वुगणसम्पन्ना भारूलता निश्चय ही नारीरत्न हैं।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# जगतः स्नेहं ग्रीष्मे पेपीयते रविः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदे स्वास्थ्यमभिलक्ष्य संवत्सरः ऋतु-विभागेन षडङ्गः स्वीकृतः। आदानविसर्गात्मकाश्च भवन्ति षड् ऋतवः। तत्रादित्यस्योदगयन-मादानमिति सम्बोध्यते। आदाने च ऋतवः त्रयः। त्रय एव हि विसर्गे भवन्ति। शिशिरादेवारभ्यत आदानकालः। वसन्तस्त्वादानस्य मध्यमः कालः। आदानस्यान्तिमः ऋतुः ग्रीष्मो भवति। भीष्मः ग्रीष्मस्तु चरमः कालो भवत्यादानस्य। कालेऽस्मिन् रविः स्व-भाभिः स्थावरजङ्गमात्मकस्य जगतः स्नेहस्वरूपात्मकं सर्वशरीरे संस्थितं सौम्यभाग-मुच्छोषयन् रौक्ष्यमुत्पादयन् सर्वेषां प्राणिनां दौर्बल्यमावहति। कालेऽस्मिन् तीव्रकक्षाः वायवश्चापि जगतः स्नेहमुपशोषयन्ति दौर्बल्यावहने च प्राथमिकरूपेण सहयोगं ददति। अत एव ह्यादानस्यान्तिमः ऋतुः ग्रीष्मो भयावहो भवति।**

आयुर्वेद में स्वास्थ्य को ध्यान में रखकर संवत्सर (एक वर्ष) को ऋतुओं के विभाग से छः अङ्गवाला स्वीकृत किया गया है। छः ऋतुएं आदान और विसर्ग स्वरूप वाली होती हैं। इसमें सूर्य के उत्तर दिशा के मार्ग को (इस मार्ग से गमन को) आदान कहा जाता है। और आदान में तीन ऋतुएं होती है तथा तीन ऋतुएं ही विसर्गकाल में होती है। आदान का माध्यम काल है। आदानकाल की अन्तिम ऋतु ग्रीष्म होती है। इस काल में सूर्य अपनी किरणों से स्थावर-जङ्गम स्वरूप वाले जगत् के सम्पूर्ण शरीर में स्थित स्नेह-स्वरूपक सौम्य भाग को शोषित करता हुआ रूक्षता को उत्पन्न करता हुआ सम्पूर्ण प्राणियों में दौर्बल्य को लाता है। इस काल में तीव्र और रूक्षवायु भी स्नेह का उपशोषण करती हैं तथा दौर्बल्य को लाने में प्राथमिक रूप से सहयोग देती हैं। इसलिए आदान की अन्तिम ऋतु ग्रीष्म भयावह होती है।

**आचार्यः चरकसंहितायां ग्रीष्मर्तुचर्यां संक्षेपेण निर्दिशन् कथयति यद् ग्रीष्मे रविः जगतः स्नेहं पेपीयते। अत एव तस्मिन् काले स्वादु शीतं द्रवं स्निग्धमन्नपानं हितकारकं भवति। शीतः सशर्करः मन्थः तु तत्र विशेषेण पातव्यः। लवणाम्लकटूष्णानां द्रव्याणामति प्रयोगस्तु निषिद्धः। सात्म्योऽपि व्यायामः स्वल्प एव करणीयः। प्रातः सायं शीतले जले तरणं कर्तव्यम्। दिवा शीतगृहे वासो विधेयः, निशि चन्द्रांशुशीतलेऽथवा चन्दनोदकादिभिः संस्पृष्टव्यजनयुक्ते स्थाने शयनं विधेयम्। यदि ए.सी. नामधेयस्य कूलरनाम्ना प्रसिद्धस्योपकरणस्योपल-ब्धता भवेत्तदा तत्संयुक्ते स्थाने शयनं सुखदं भवति। उपर्युक्तानां सर्वेषामभावे तु स्वच्छस्थाने प्रकृति-प्रदत्तस्य वायोः संरक्षण एव शयनं विधेयम्। यद्यपि प्रहरैकपर्यन्तन्तु योगवाही वायुः किञ्चिदुष्ण एव प्रवहति, पुनरपि स तु सह्यः किञ्चित्कालानन्तरं च सुखसंस्पर्शात्मक एव भवति। शीतानां कानना-नामुपसेवनं दिवा कर्तव्यं रात्रौ तु सुकोमलानां कुसुमानां यद्युपलब्धता भवेत्तदा तु तेषां संस्पर्शनं यथेष्टं करणीयम्। ये तु सम्पन्नाः जनास्सन्ति ते चन्दनदिग्धाङ्गाः भवेयुः। अन्ये सामान्याः जनास्तु 'मुल्तानी-मिट्टी' इत्यनया शरीरे प्रलेपनं तनुस्वरूपा-**

**त्मकमेव कुर्युः। ग्रीष्मे मद्यप्रयोगः विशेषेण हानिकारको भवत्यत एवोचितमात्रयापि तस्य पानं कालेऽस्मिन्न करणीयम्। सामान्ये निर्दिष्टैषा ग्रीष्मर्तुचर्या। केचन व्यावहारिकाः प्रयोगाः कर्तव्याकर्तव्यनिर्देशास्तु क्रमशोऽत्रोल्लिख्यन्ते।**

**- मन्थप्रयोगः कर्तव्यः। सक्तवः सशर्कराः फलरससंयुक्ताश्च शीतवारिसम्मिश्रिताश्च मन्थ-सम्बोधनेन सम्बोध्यन्ते। अथवा**

**सक्तवः सर्पिषा युक्ताः शीतवारिपरिप्लुताः।**
**नात्यच्छा नातिसान्द्राश्च मन्थ इत्याभिधीयते।।**

चरक संहिता में आचार्य ग्रीष्म ऋतुचर्या को संक्षेप में निर्दिष्ट करते हुए कहते हैं कि ग्रीष्म में सूर्य अपनी किरणों से संसार के स्नेह को (सौम्यांश को) अत्यधिक पीता है (पेपीयते अत्यर्थं पिबति)। इसलिए उस काल में मधुर, शीत, द्रव और स्निग्ध अन्नपान हितकारक होता है। उस काल में विशेषरूप से शर्करायुक्त शीतलमन्थ तो विशेष रूप से पीना चाहिए। लवण, अम्ल और कटुरस वाले द्रव्यों का तथा उष्ण द्रव्यों का अति प्रयोग तो निषिद्ध है। व्यायाम यदि सात्म्य है तो भी स्वल्प ही करना चाहिए। प्रातःकाल और सायंकाल जल में तैरना चाहिए। दिन में शीतल गृह में निवास करना चाहिए और रात में चन्द्रमा की किरणों से शीतल अथवा चन्दन के जल आदि से स्पर्श किए हुए पंखे वाले स्थान में शयन करना चाहिए। यदि ए.सी. और कूलर नाम से प्रसिद्ध उपकरण की उपलब्धता हो तो उससे युक्त स्थान में शयन करना सुखद होता है। उपर्युक्त सब के अभाव में स्वच्छ स्थान में प्रकृतिप्रदत्त वायु के संरक्षण में ही शयन करना चाहिए। यद्यपि एक प्रहर तक तो योगवाही वायु कुछ उष्ण ही बहती है फिर वह तो सहन करने योग्य होती है और कुछ समय के बाद सुख स्पर्शवाली हो जाती है। दिन में शीतल वनों का सेवन करना चाहिए और यदि उपलब्धता हो तो रात्रि में सुकामल फूलों का स्पर्श यथेष्ट करना चाहिए। जो सम्पन्न लोग हैं वे चन्दन का लेप अंगों पर करें और अन्य सामान्य लोग तो मुल्तानी मिट्टी से शरीर पर पतला लेप करें। ग्रीष्म में मद्य का प्रयोग विशेष रूप से हानिकारक होता है इसलिए उचित मात्रा में भी इसका पान इस काल में नहीं करना चाहिए। सामान्य रूप से यह ग्रीष्म ऋतुचर्या निर्दिष्ट कर दी गई। कुछ व्यावहारिक प्रयोग और करणीय अकरणीय निर्देश तो यहाँ क्रमशः उल्लिखित किए जा रहे हैं-

- मन्थ का प्रयोग करना चाहिए। शर्करा और फलरस मिला हुआ तथा ठण्डे जल में घोला हुआ सत्तू मन्थ नाम से सम्बोधित किया जाता है। अथवा -

घी से युक्त ठण्डे पानी में घोला हुआ सत्तू जो कि न तो अधिक पतला हो तथा न अधिक गाढा हो उसे 'मन्थ' कहा जाता है।

**- ग्रीष्मे मुहुर्मुहुर्वारि पिबेदभूरि, तदपि मृत्पात्रे शीतीकृतम्।**

**- सुशीतं दध्ना निर्मितं 'लस्सीति' नामधेयं पेयं यथेच्छं पिबेत्। पेयमिदं सशर्करमथवा सलवणं प्रयोक्तव्यम्।**

**- प्रचुरमात्रायां, छच्छिकायाः प्रयोगोऽपि सुखदो भवति। अनया सह पलाण्डुभक्षणं सूर्यसन्ताप-निवारकं भवति।**

**- ग्रीष्मे पुदिनस्य प्रयोगः सर्वोत्कृष्टो भवति। सामान्यतया कदाचित् भीष्मग्रीष्मोष्णेन सन्तप्तः जलोंऽशुघातेन पीडितो भवति तत्र हि वान्तिः**

**विशेषेण भवति, तृष्णापीडितः सः जनः ज्वरेणाक्रान्तो भवति, कण्ठशोषश्च जायते तदा तु पुदिनप्रयोगः तृष्णानिवारको वमननाशको भवति। ग्रीष्मेऽतिसारोऽपि भवति, कदाचिद् वमनातिसार-तृष्णादिलक्षणैः सह 'विषूची' इत्याख्यो रोगोऽ-पि जायते, तत्रान्येषां लक्षणानामपि संस्थितिर्भवति। रोगेऽस्मिन् चिकित्सकैर्निर्दिष्टानामौषधीनां प्रयोगस्तु परमावश्यको वर्तते ताभिः सहैव पुदिनस्य प्रयोगोऽपि हितावहो भवति। आचार्येण भावमिश्रेण भावप्रकाशे पुदिनस्य गुणाः विशेषेण निदर्शिताः-**

**पुदिनस्तु गुरुः स्वादू रुच्यो हृद्यः सुखावहः।**
**मलमूत्रस्तम्भकरः कफकासमदापहः।।**
**अग्निमान्द्यविषूचिघ्नः संग्रहण्यतिसारहा।**
**जीर्णज्वरं कृमींश्चैव नाशयेदिति कीर्तितम्।**

**पुदिनस्य संस्कृतनामान्यप्यस्य**

**- गुण प्रदर्शकानि भवन्ति। यथा-**

**व्यञ्जनो वान्तिहारी च रुचिश्चः शाकशोभनः।**

**ग्रीष्मेऽन्येऽपि बहवः सुखकराः योगाः प्रयोगाश्च सन्ति, तेषामुल्लेखोऽग्रिमे लेखे करिष्यते।**

- ग्रीष्म में बार-बार थोड़ा-थोड़ा पानी पीना चाहिए, वह भी मिट्टी के पात्र में ठण्डा किया हुआ (होना चाहिए)।

- दही से बने हुए अच्छी तरह ठण्डे 'लस्सी' नाम के पेय को यथेच्छ पीना चाहिए। यह पेय शर्करायुक्त अथवा लवणयुक्त प्रयुक्त करना चाहिए।

- प्रचुर मात्रा में छाछ का प्रयोग भी सुख देने वाला होता है, इस के साथ प्याज खाना सूर्य के सन्ताप को दूर करने वाला होता है।

- ग्रीष्म में पुदीने का प्रयोग सर्वोत्कृष्ट होता है। सामान्यतया कभी प्रचण्ड ग्रीष्म की उष्णता से सन्तप्त व्यक्ति अंशुघात से (लू-लगने से) पीडित होता है तो उसमें विशेष रूप से वमन होता है, तृष्णा से पीडित वह व्यक्ति ज्वर से भी आक्रान्त होता है, और कण्ठशोष होता है तब तो पुदीने का प्रयोग प्यास को दूर करने वाला और वमननाशक होता है। ग्रीष्म में अतिसार भी होता है, कभी वमन, अतिसार और तृष्णा आदि लक्षणों के साथ विषूची (हैजा) नाम का रोग भी हो जाता है, उसमें अन्य लक्षणों की स्थिति भी होती है। इस रोग में चिकित्सकों के द्वारा निर्दिष्ट औषधियों का प्रयोग तो परमावश्यक है ही, उनके साथ ही पुदीने का प्रयोग हितकारक होता है। आचार्य भावमिश्र के द्वारा भावप्रकाश में पुदीने के गुण विशेष रूप से बताए हैं-

'पुदीना' तो गुरु, मधुर रुचिकर, हृदय के लिए हितकारक और सुखकारक होता है। यह मल-मूत्र का स्तम्भन करने वाला तथा कफ, कास और मद को दूर करने वाला होता है। अग्निमान्द्य तथा विषूचिका रोग को नष्ट करने वाला तथा जीर्णज्वर एवं कृमियों को नष्ट करता है, ऐसा कहा गया है।

पुदीने के संस्कृत नाम भी इसके गुणों को प्रदर्शित करने वाले होते हैं, यथा-

व्यञ्जन, वान्तिहारी (वमन का हरण करने वाला), रुचिकारक, (शाक को अच्छा बनाने वाला) शाकशोभन।

ग्रीष्म में अन्य भी बहुत से सुख करने वाले योग और प्रयोग हैं, उन का उल्लेख अग्रिम लेख में किया जाएगा।

**८०, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

निर्माता

**ए.सी. प्रेशर पाइप्स**

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

**छत्त एक, लाभ अनेक**

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

**राष्ट्रीय विचारों के लिए पढ़ें**

**पाञ्चजन्य Organiser**

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60
**Reach millions of consumers through our weeklies**

**भारत प्रकाशन (दिल्ली) लि.**
2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,